श्रीरामवर्मविजयः



PRINTED & PUBLISHED BY M. V. UZHUTHRA VARIER
V. C. PRESS,—PERUMUDIYUR,

1930

श्रीरामवर्मविजयमहाकाव्यम्

एं. कुञ्ञापरनाम्ना रुद्रदासेन प्रणीतम्

टि. आर्. शिरोमणिरित्यनेन विरचितया सार-
सञ्जीविन्याख्यया लघुव्याख्यया सङ्कलितम्

प्रकाशितं च विद्वन्मणिना निलिम्पपुरेश्वरेण
श्रीमानवेदराजेन

विजेजीयतामेतज्जगत्याचन्द्रतारम्

[मूल्यमस्य [illegible]]

अनुमोदनम्

श्रीरामवर्मविजयाख्यनवीनकाव्य-
मापादचूडमहमादरतोनुवाच्य ।
सन्तोषभारमतिमात्रमुदीतमेत-
मर्पयामि विदुषां पुरतो विनीतः ॥ १ ॥

नात्रातिविस्तरवशादनुवाचनेच्छा-
मान्द्यं सतां क्वचिदपि प्रभवेत् प्ररूढम् ।
संकोचभूमवशतोपि तथैव वेद्य-
वस्त्वज्ञता न समुदेष्यति युक्तमेतत् ॥ २ ॥

नेतुर्महोद्यमनिधेः प्रभुशक्तिभाजः
प्रज्ञाविलासमहनीयतमस्य काव्ये ।
आलंबनाद्विविधवस्तुविशेषजात-
संवर्णनावसरलाभ इहाप्यनिष्टः ॥ ३ ॥

वर्ण्यानि यानि नगरार्णवशैलमुख्या-
न्यालोच्य सद्भिरुदितानि सुसूक्ष्मधीभिः ।
स्थाने यथोचितममूनि वचोविलासैः
संवर्णितानि सुधियां प्रमदं विदध्युः ॥ ४ ॥

उत्कर्षमत्र सकलेष्वपि वर्णनेषु
व्यक्तीकृतं कविवरेण विभाव्य नेतुः ।

आश्चर्यसंमदभरौ मनसि स्फुरन्तौ
स्पष्टीकरोतु कथमल्पमतिर्जनोयम् ॥ ५ ॥

काव्येत्र वर्णितमनेकविधं पदार्थ-
जातं प्रतीयत इवात्मदृशैव साक्षात् ।
ज्ञातं मनीषिविदुषामनुवाचकाना-
मेतन्महत्त्वमिदमीयमहो व्यनक्ति ॥ ६ ॥

तत्तत्प्रयोगसरणिः सरळापि भंगीं
शाब्दीं क्वचिच्च न जहाति, तथापि भाति
अक्लिष्टयैव विधयात्र विवक्षितार्थ-
सर्वस्वबोधनचणेति विचित्रमेतत् ॥ ७ ॥

यर्यग्रहीत् कविवरो रघुकाव्यरत्ने
रीतिं सुधीवरनुतां यमकादिरम्याम्
यामत्र तां प्रकटितामुचितावकाशे
पश्यंश्चमत्कृतिमहो महतीं भजेत ॥ ८ ॥

व्यंग्यार्थसंघटनमात्तरसा च शय्या,
माद्वीकपाकमधुरश्च वचोनिगुंभः ।
रीतिश्च तत्तदुचिता, बहुना किमुक्ति-
जातेन सम्प्रति इदं रमणीयकाव्यम् ॥ ९ ॥

Preface.

I regard it a great compliment from my friend Mr. M. Kunhan Varier, that he has sent his new Sanskrit poem Sreeramavarmavijaya to me for a preface introducing it to the public. While it is a matter of grave doubt whether I have any qualification to write an introductory preface to such a work except the friendship that I bear to its author and, the great admiration in which I hold Sir Rama Varma the Senior Maharaja of Cochin, who is the subject of it, I am sure that the association of my name with it will be a good means of introducing myself to the public. For is it not said:—

"गुणवद्वस्तुसंसर्गाद्याति स्वल्पोऽपि गौरवम्।
पुष्पमालानुषंगेण सूत्रं शिरसि धार्यते"॥

There is no doubt whatever about the qualifications of the author. He is a good scholar of wide reading and deep penetration. That he is a poet of no mean order is well proved by the great number of poems, both Sanskrit and Malayalam, that have been appearing in the various Malayalam journals such as the Vidyavinodini, the Rasikaranjini and the Kavanakoumudi for over thirty years. He has had the rare privilege of personally attending on the Maharaja for a considerable time and of observing him at close quarters. And his unswerving faithfulness to, and un-

limited admiration for his great master are matters of constant talk among his numerous friends. All these circumstances conjointly make him the fittest man to write a poem on the wonderful career of the great Sir Rama Varma, Maharaja of Cochin.

As for the subject of the poem, I congratulate Mr. Varier on the good fortune that gave him such an interesting subject engrossing enough to gratify his versatile poetic genius to the full. The brilliant rise of Sir Rama Varma, the splendid effulgence with which he flooded the entire Cochin State and the throbbing life-energy which he blew into every part of its administrative body could never fail to stir the imagination of a poet of any real worth. Nor are his personal merits of an ordinary kind, which when one considers one is tempted to exclaim with the great poet "गुणैरेतावद्भिर्जगति पुनरन्यो जयति कः" !

Look how this same sentiment was once expressed by so eminent a judge of personal merits as the late Lord Curzon when he said:—

"बुद्ध्या शक्त्या विद्ययौदार्यतो वा-
प्येतादृक्षः क्षोणिपः क्षोणिपृष्ठे
दृष्टो न" ... ...

(Ramavarmavijaya canto IV stanza 23).

Look again how easily he outshone all the other

Maharajas that had assembled at Delhi on the occation of the Great Durbar.

"संवीक्ष्यतां पुरमिहावसति क्षितीशे
सर्वे च भूमिपतयः क्रमशस्समीयुः ।
सत्क्षत्रतेजसि लसत्यलमत्र राज्ञि
नक्षत्रतामितरभूमिभृतो व्यतन्वन्" ॥

(Ibid VI-54)

Yet how touching is the humaneness of his nature his sense of equality, his love, as witnessed by his domestic behaviour on his return home after the Durbar and the pilgrimage:—

"काञ्चित् पुनस्स्वजननीकरुणाकटाक्ष-
पात्रायितामिह चिराज्जरठाञ्च शूद्रीम् ।
आनाय्य मातरमिवैव कृतादरोसौ
गंगाक्षमाल्यपरिपूततनुं व्यतानीत्" ॥

(Ibid VI-70)

About the statesmanship and the great administrative capacity of the Maharaja there are no two opinions. Of the three classes of rulers, Swayatthasiddhi, Sachivayatthasiddhi and Ubhayayatthasiddhi, undoubtedly he belonged to the first. That he had able ministers and administrators to look to the details of the government of the state does not bar hi

claim to being regarded a swayatthasiddhi ruler, for it is not expected of the ruler of a state that he should himself look into all the details of the administration. All that is expected of him is that he shobld choose able officials and control them so that he might be said to govern the state through them. Thus Kamandaka says:—

"यथान्तरात्मा प्रकृतीरधिष्ठित-
श्चराचरं विश्वमिदं समश्नुते ।
तथा नरेन्द्रः प्रकृतीरधिष्ठित-
श्चराचरं विश्वमिदं समश्नुते" ॥

This is exactly what Sir Rama Varma was, for mark what our poet says in this connection.

"मन्त्री नित्यं सर्वकार्यैकधुर्यः
सत्यं जागर्त्येव सर्वत्रवर्यः ।
यद्यप्युद्यत्पौरुषा सर्वतोपि
प्रत्यक्षेव प्रैक्षि राज्ञोस्य शक्तिः" ॥

(Canto IV-47)

"यावत् भूपस्याशयोऽलक्षि भिन्न-
स्तावन्मन्त्रीन्द्राशयस्सञ्चुकोच ।
वह्नेस्तेजः प्रस्फुटं प्रज्वलेत् किं
मार्तण्डीये धाम्नि देदीप्यमाने? ॥

(Canto IV-49)

सत्कृतिं [illegible]-
स्तस्य एव सकलां क्षितीश्वरम् ।
[illegible]ष्टिरस्य खलु तादृशी वरे-
ल्लौज्झि दुष्कृतिगतिः [illegible]" ॥

(Canto IX-14)

The various reforms that he introduced into the administration of the state, though they caused some heart-burning in certain quarters at the time, have, since, been universally acknowledged to be great benefactions. Of the numerous schemes that he set his hand to for the development of the resources of the state, only one remains yet to be completed, viz. the great Cochin harbour scheme which, we can be sure, will be completed ere long. This done, we shall be able to apply to Cochin, with far greater propriety, what the great scholar-poet Uddanda says about the Calicut of his time. This is what he says:—

"यत्र ज्ञात्वा कृत[illegible]-
स्मन्ये स्नेहा[illegible] वाहिनीनां [illegible] ।
तत्तद्द्वीपान्तर[illegible]
नौकाजालं मुहुरुपहरन्[illegible]" ॥

(Kokilasandesa)

Having got a suitable subject, the poem has naturally enough taken the form of a Mahakavya with Veera Rasa for its predominating sentiment. [illegible]

beginning to end the poem is completely taken up with the unceasing activities of the great Maharaja and as such Sringara and other soft sentiments have only a very subordinate part in it. Although the work does not lack in any of the kavyagunas, a fine perspicuity (प्रसाद) and a soft sweet flow of diction (माधुर्य) are most prominently to be seen everywhere in it. I take two verses at random to exemplify this.

"तत्राम्बुकम्पाकुलमीनलोचना
  सुफेनमन्दस्मितकुन्दसद्युतिः ।
समुल्लसत्स्वच्छकमलामलानना
  नृपस्य मानेव सुखाय कामवत्" ॥
निषेव्य तां तत्र नदीं यथासुखं
  तदाश्रितानप्युपलाल्य जीविनः ।
स्वानुगैस्सार्द्धमिनवल्लभो नृप-
  न्महाजनैश्शाश्वतसेव्यतां गतैः" ॥

(Canto II-3[illegible])

Arthalankaras have been profusely used in this poem. Our poet is a great lover of alankaras but not a slave of them. He knows their duty to be to make clear the speaker's ideas to others and not to mystify them, so that he seldom resorts to them except for that purpose. That our author is ripe enough to be above all temptations to revel in trashy Sabdalankaras is a matter for great consolation to a serious

reader although examples of some modest Prasas and Anuprasas are not altogether wanting. It must, however, be admitted that the tri-syllabic Yamaka used in tenth canto where the Druthavilambitha metre has been adopted is not merely inoffensive but really grateful to the ear. Examples might be quoted still further in proof of these statements, but already a good part of the text has been transferred to the preface, and let there be a stop.

On the whole the poem has been written with great care, and will, I am sure, be read with great delight by the Sanskrit-knowing public. It has, most deservingly, been written in the Sanskrit language because Maharaja Sir Rama Varma has long outgrown Malabar and his life is a subject of interest to all people throughout India. I have been subjected to some disappointment by the sudden termination of the poem at the Shashtipurthi of the hero. Although the Shashtipurthi was not-distantly followed by his handing over the sceptre to his successor, Sree Rama Varma's Vijaya need not necessarily stop there. When the Sun has sufficiently long passed the meridian, the man in the street may be inclined to call him Vriddharka and look for his decline, but a true thinker knows that he is even then a Balarka rising in some other horizon. It is, however, a matter of comfort that the author has seen this fact since he likens our hero to the great Raghu in this connection. If we

does not enlarge upon this new phase, it is, perhaps because it is not yet time for that. Let us also not be in any hurry for it.

With this preface and with a full hope that Sreeramavarmavijaya will satisfactorily fulfill the honourable mission of a poem as defined in

"काव्यं यशसेऽर्थकृते
व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये
कान्तासम्मिततयोपदेशयुजे." ॥

I beg to introduce it to the kind reception of the public.

Kottakal,
—1—1106

K. C. Veeraravan Raja,
B. A., L. T.

आमुखोपन्यासः

शाब्दिकस्य सदाचार्यस्यानन्तस्य कृपावशात् ।
शब्दशुद्धिरिहाक्लिष्टैवास्त्विति प्रार्थये मुहुः ॥ १ ॥

वर्षाणां विंशतेः पूर्वमेतन्नायकसद्गुणैः ।
प्रेरितो व्यलिखं किञ्चित् काव्यं नव्यमभव्यजित् ॥ २ ॥

तच्च साहित्यपरिषत्प्रेरणेन परार्ध्यकम् ।
सूरिभिर्बहुशस्संशोध्यामुद्रापयमेषमः ॥ ३ ॥

इति पुस्तकमारूढं निस्तुलं निखिलादृतम् ।
चरितं सद्गुणाढ्यस्य नृपर्षेर्दृश्यतां बुधैः ॥ ४ ॥

वन्दे मातृमहाराज्ञीं विज्ञामद्यतनीं सदा ।
यया प्रोत्साहितोस्मि द्रागेतन्मुद्रापणेऽधिकम् ॥ ५ ॥

श्रीनीलकण्ठशर्माणमेतन्मुद्रालयेश्वरम् ।
विद्वद्गुरुं विशिष्यैव वीक्षे विज्ञानुमोदकम् ॥ ६ ॥

प्रकाशकं नरेन्द्रं च प्रसिद्धमतुलैर्गुणैः ।
कृतसाहाय्यकांश्चान्यान् मान्यान् मान्येऽनघोत्तमान् ॥ ७

व्याख्यातुराघवार्येण संबद्धोऽस्मि सदाप्यहम् ।
येन सद्गिरमादृत्य व्यधायि समयक्रयः ॥ ८ ॥

विशेषश्च चात्र विनिश्चयश्चाविदग्धानः ।
कृष्णो महाभागिनेयस्तु सुधीरस्यमामनन्यते ॥ ९ ॥

श्रीवीरराजनृपतिस्सुकृती मनीषा-
त्येनाधिकारितमिदं हि गिरां मतानाम् ।
श्लाघ्याभिरहीनि सुधीरस च स्वकाम-
श्श्रीनीलकण्ठविबुधाश्रितकार्यदर्शी ॥ १० ॥

एतत्काव्यस्यन्त्यानिव वङ्कराङ्क महाकविना
केरलकविसार्वभौमेन विरचितं किमपि
हृद्यतमं पद्यं चात्र प्रदर्श्यते ।

कालीं यथा दासतामिथापीन्
स कालिदासः कविसार्वभौमः ।
तथैव तस्याः पतिमत्र रुद्रं
श्रीरुद्रदासोऽयमिति प्रियं नः ॥

समर्पणम्

वैदुष्येण हि वैधता वितनुते
यस्मिन् विकासं मुहुः
धीमान् सोऽपि च रामवर्मनृपतिः
प्रीतः परं यद्गुणैः।
गोश्रीमण्डलपण्डितोडुनिकर-
स्येन्दोस्सवर्णस्य मे
तस्यार्यस्य गुरोः पदांबुज इदं
भक्त्यार्प्यते पुस्तकम् ॥

ग्रन्थकर्ता



विश्रान्तिमनुभवन् मग्. श्री रामवर्म महाराजः

जि. सि. एस. ऐ; जि. सि. ऐ. ई.

The Mangalo

श्री

श्रीरामवर्मविजयः

प्रथमस्सर्गः

अस्ति श्रियां नित्यविहारभूमि-
र्माटत्तमावल्लभतल्लजानाम् ।
काचित् पुरी काञ्चनरत्नपूर्णा
पूर्णत्रयीति प्रथिता पृथिव्याम् ॥ १ ॥

या केरळश्रीतिलकायमाना
नानागुणोदारविभूतिरम्या ।
हर्म्याग्रालिस्फाटिकजालभासां
हासादिवेन्द्रादिपुरीर्धुनोति ॥ २ ॥

टिप्पणी–मत्कुलांभोजमार्तण्डं कृष्णं भक्त्या प्रणम्य तम् ।
श्रीरामवर्मविजयव्याख्येयं लिख्यते मया ॥

[१] Trippunithura [२] दिव्यानां हि सौधोपहासः सुतरां दुस्सह एवेत्यभिप्रायः ।

यत्र ध्वजाग्राश्रितपन्नगारिः
　स्फुरत्फणीन्द्रासनसन्निषण्णः ।
जिष्णुश्रिया विस्मयदैर्विलासै-
　र्विस्मृत्य वैकुण्ठमकुण्ठमास्ते ॥ ३ ॥

यत्सौधशृंगेषु निधाय नित्यं
　पादाग्रमादाविह लोकबन्धुः ।
याति क्रमेणोच्चपदं सुधीभ्यः
　कुर्वन्निवारात् कुशलोपदेशम् ॥ ४ ॥

यस्यास्तु मध्येधिकजृम्भताग्रो
　जागर्त्ति घण्टाश्रितसौध एकः ।
येन स्वनादैर्दिविषज्जनोपि
　विज्ञाप्यते कालकलाविभागान् ॥ ५ ॥

यत्रांगनानां नवरूपलक्ष्मी-
　र्नित्यं हरत्याशु मनांसि यूनाम् ।
आसां तु चेतांसि विधूतपापा
　पूर्णत्रयीशांघ्रिसरोजभक्तिः ॥ ६ ॥

---

[१] सूर्यः स्वोदयक्रमेण अभ्युदयमभिलषतां लोकानामिय-मेव पुरी वरिष्ठोवलंब इत्युपादिशतदित्युत्प्रेक्षा । [२] Clock tower

यैर्माञ्चितश्रीविभवामयोध्या-
मध्यास्य पौरा मधुरां विलासैः ।
आश्रित्य गोश्रीरमणं सदापि
निन्दन्त्यनुस्मृत्य रघून् यदूंश्च ॥ ७ ॥

तां सत्पुरीमल्पितकिन्नरेश-
श्रिया धिया धिक्कृतसोमसूनुः ।
श्रीरामवर्मा नृपतिश्चिराय
प्रशास्ति नीत्याखिलगीतकीर्तिः ॥ ८ ॥

कोळंबवर्षे स नरेश्वरोष्टा-
विंशे सहस्रात् परतः प्रवृत्ते ।
चापाख्यमासेऽवततार भूमौ
रामावतारर्क्षदिनेऽतिपुण्ये ॥ ९ ॥

---

[१] अयोध्यां योद्धुमशक्यां मधुरां रमणीयां गोश्रीरमणं गोश्रीराजं [The Maha Raja of Cochin] रामकृष्णात्मकं पूर्णत्रयीशं च । अयोध्यावासिनां मधुरावासिनामपि गोश्रीशाश्रयसौकर्यं नैवं सर्वदापि सञ्जातमित्यत्र निन्दाबीजम् ॥

[२] १०२८ कोळंबाब्दे धनुर्मासि पुनर्वसुनक्षत्रेयमवातरत् भूमाविति बोध्यम् ।

मुखे भुजे वा नयनेऽधिकत्वं
नैतस्य केनापि तदाऽवलोकि ।
अवेक्ष्य तेजोऽधिकतां तु विज्ञा
मूर्तित्रयांशत्वममन्वतास्मिन् ॥ १० ॥

विधृत्य गर्भेण रसात् सुवीत
यथाद्रिजा शक्तिधरं कुमारम् ।
कुमारकस्यास्य च सा सवित्री
भवेज्जगत्यामुपमेयभाग्या ॥ ११ ॥

जाता पुरालंकुरुते स्म "कोच्चि-
क्कावि"त्युदारा सहजास्य गोत्रम् ।
याभूतबाल्येऽप्यतुलामभिख्यां
संगीतसाहित्यकलाविलासैः ॥ १२ ॥

विलोक्य तं विस्मयहर्षवेगै-
र्विलोलचित्तास्सुहृदो बभूवुः ।
विशेषत"स्संगमसिन्धुपृष्ठ"-
महीसुराढ्योऽस्य पितातिधन्यः ॥ १३ ॥

---

[१] मूर्तिमयोऽयमिति बुधैरतिमानुषतेजोविशेषणैरनुमितम् । "अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः । अफाललोचनश्शंभुरयं साटमहीपतिः" इति भावः । [२] अस्य जनन्या भाग्यमिदानीमनुपमेयमेवेत्याशयः । [३] Namboodirippad of Koodalatupuram.

स मा[१]तुलो भूतलपालकोस्य
प्रत्येकमत्यादरतश्शुभार्थी ।
ततान पुण्यान्यथ यो चिरेण
वपुश्च काश्यां न्यसृजाद्विशुद्धः ॥ १४ ॥

जीवन् हि यश्शं[२]करमेव नित्यं
विश्वस्य कार्येष्वनयत् स्वकालम् ।
काशीं गतः प्रेत्य च शङ्क[३]रोप-
देशात् परं सौख्यमवाप धन्यः ॥ १५ ॥

अनन्तरस्सोपि सुधीः क्षितीन्द्रः
कुमारमेतं कुतुकेन पश्यन् ।
महीसुरैस्संस्करणानि योग्या-
न्यकारयत् सत्गुणसम्प्रहृष्टः ॥ १६ ॥

श्रीरामवर्मेति ततः प्रतीतः
श्रीरामजन्मर्क्षदिनात्तजन्मा ।

[१) काश्यां विसृष्टदेहस्स हि तदानीन्तनो महाराजस्त्वेतज्जन्मकथामाकर्ण्यैवागमत् स्वर्गमिति सुप्रसिद्धम् । [२] Divan Sankara Variar [३] काश्यां हि पञ्चक्रोशाभ्यन्तरे तनुत्यजां प्राणप्रयाणकाले भगवान् साक्षात् परमेश्वरः कर्णे तारकब्रह्मोपदिशतीति प्रसिद्धिः ।

श्रीरामवंशांकुर एष चैकः
श्रीराम इत्येव किलोचे लोकैः ॥ ॥ १७ ॥

दिने दिने साकमथो बुधानां
मुदा पुरेऽस्मिन्स पुपोष वृद्धिम् ।
महीशवंशोऽपि च मातृपूर्वः
पदे पदे भूतिमभूतपूर्वाम् ॥ ॥ १८ ॥

स बालचापल्यविलासभेदै-
र्विभूषयन्नालयभूविभागान् ।
विशेषरम्यो विजहार धिन्वन्
मनांसि नेत्राणि च मानवानाम् ॥ १९ ॥

शनैश्शनैस्सोऽक्षितधीतरण्या
क्रमेण विद्याजलधिं विगाह्य ।
विहर्तुकामो विचचार वर्ण-
क्रमावलीरूपसरित्सरण्याम् ॥ २० ॥

---

[१] यथाकश्चिदंबुधिं प्रवेष्टुकामस्सरित्सरण्यां तरण्या गच्छति । तथायमप्यखिलशास्त्रौघं पिपठिषुः कुमारस्तुलितया धियाक्षरावल्यामक्लेशसञ्चारमकरोत् लिपिग्रहणादिविद्याभ्याससरणिमा-गच्छत्तानित्यर्थः ॥

स पाणिवादस्सुमतिस्तदानी-
मेतत् गुरुप्वभिमतां गतोभूत् ।
कुञ्ञुण्णनामा खलु तावदेव
दिक्ष्वाश्चितः कोप्यनघोस्य शब्दः ॥ २१ ॥

भूमीन्द्रवर्यस्य नियोगतश्च
गोविन्दसेवोदितवैभवाच्च ।
तारुण्यतः पूर्वमयन्तु लेभे
सामान्यतस्संस्कृतसारबोधम् ॥ २२ ॥

सोगान्नवात्रिंश इहाथ वर्षे
नाकं नरेन्द्रोप्यवनिं निधाय ।
शंकुण्णिनाम्ना सचिवेन साकं
स्वानन्तरेऽनन्तगुणे नृपर्षौ ॥ २३ ॥

---

[१] केरळदेवालयेष्वेव कथकैः प्रचार्यमाणे पुण्यकथाकथनात्मके कस्मिंश्चिद्रूपकभेदेवाद्यवादनं येषां विद्यते कुलविद्या ते पाणिवादाः केरळ्यां "नम्प्यार्" इति व्यवह्रियते । तत्कुलजः पाणिवादस्य हि शुभशब्दोच्चालने सुतरामस्ति सौकर्यमित्यप्यत्र बोध्यम् । [२] पूर्णत्रयीशः तन्नामा विद्वन्मणिः पाणिवादश्च ।
[४] Dewan Sankunni Menon तेन साकं अवनिं निधायेत्यन्वयः ।

यस्य प्रियासीन्नवयौवनेपि
निर्धूतपापा हरिभक्तिरेव ।
राज्यश्रिया साकमिमां चिराय
शान्तिक्षमाभ्यामपि योभ्यनन्दत् ॥ २४ ॥

स रामवर्मा तु सनामधेयं[1]
कुमारमेतं कुलपारिजातम् ।
मुदाभिनन्दन्नुचितार्थदानैः
परं तुतोषास्य गुणैरनर्घैः ॥ २५ ॥

अथोपनीतं शुचिमेखलाङ्कं
करोल्लसत्पुण्यपलाशदण्डम्[2] ।
उपादिशत्तं हि यथार्हमेत्य
श्रुतौ[3] उपाध्यायमहीसुरेन्द्रः ॥ २६ ॥

ततस्समावर्तनकृत्यसार-
निर्वर्तनेनाधिकमुज्ज्वलश्रीः ।

---

(१) समानं नामधेयं यस्य तम् । [२] यद्यपि क्षत्रियाणां पिप्पलदण्डधारणं विहितं तथाप्यत्रैवमाचारानुरोधेनोक्तम् । [३] Vadyan Namboodiri of Trichur.

पूर्णत्रयीशांघ्रिसरोजमेव
संसेवमानोनयदेकमब्दम् ॥ २७ ॥

तदा निरूढो भजनावसान-
महोत्सवो दिक्ष्वधुनापि सर्वैः ।
संस्तूयते यत्र घनो जलानि
यथा तथायं हि धनान्यवर्षत् ॥ २८ ॥

सुधीस्तदानीन्तन एतदीयं
गुरुत्वमादृत्य स विधेयापि ।
तृतीयराजः प्रथमो व्यलासी-
दुदारशिष्यात्तमुदां बुधानाम् ॥ २९ ॥

अशेषविद्यानिलयं हि शेष-
माचार्यमानाय्य गुरुप्रियोसौ ।
आदाय विद्याः कुतुकेन तास्ताः
क्रमादशेषं च तमाततान ॥ ३० ॥

---

[१] अत्र हि राजकुमारास्सर्वेपि समावर्तनानन्तरं वत्सरमेकं भजन्ते पूर्णत्रयीशमिति प्राचीनोयं नियमः । [२] जन्मना गुरुत्वं सिद्धं खलु । [३] निरवशिष्टं शेषाचार्येणतास्सकला अपि विद्या जग्राहेत्यर्थः । शेषमशेषमाततानेति विरोधाभासश्च प्रतीयते ।

सखीस्थ्यर्थतां केचिदिहाभ्युपेता
न शेकुरन्वेतुमिदं नृपोऽपि ।
सुहृत्त्वमास्तां तुरंगमाद्याः
शृङ्खलुवालं स्थापयितुः किम् ॥ २१ ॥

इत्येष विद्यापरपारदृश्वा
विख्यातशालीनितभासुभावः ।
गोत्रीमहाशान्तपरिप्रदीपः
कौमारमुल्लंघ्य वयो व्यलासीत् ॥ २२ ॥

केशादिपादान्तनखांगमुख्यै-
रम्योल्लसत्त्वं सुतरां शशंस ।
विशेषतस्तून्नत[३]नासिकाग्र-
सत्कार्णिकं फुल्लमुखारविन्दम् ॥ २३ ॥

आरूढतारुण्यमिमं तरुण्यो
धीरं वताकम्पयितुं न शेकुः ।

---

[१] बाष्पशकटम् । [२] नवयौवनदशामासेदिवान्नित्याशयः । [३] नासिकाया उन्नतत्वमिति महापुरुषलक्षणम् ।

चारुत्व[illegible]गात् सकलांगकान्ता
   मारां नु [illegible]तांस्थ्यमभ्यह[illegible]र्षीत् ॥ ३४ ॥

तं वीक्ष्य [illegible]स्मा[illegible]सुत इत्यपत्य
   महृ[illegible] किमु तत्र पुर्वाम् ।
नित्यं व[illegible] [illegible]तरा[illegible]शेषा-
   द्भिर्भ[illegible]तोत्तानि [illegible]लो[illegible]कितानि ॥ ३५ ॥

वचस्तु[illegible] [illegible]स्य वपुश्रियं च
   श्रो[illegible] [illegible] [illegible] लोकाः ।
कृतार्थता [illegible]माप ते[illegible]रेऽन्तः
   कृतोत्पन्द्रद्भु[illegible] [illegible]लाप्याम् ॥ ३६ ॥

सुपावनं [illegible]
   नवं [illegible] [illegible]सपत्न्यः ।
समा[illegible] [illegible] [illegible]भून्
   मयं [illegible]माणा[illegible]ताः ॥ ३७ ॥

[illegible]स्तु [illegible] [illegible]जस्य [illegible]:
   प्रशास्त्र[illegible] [illegible] सुधन्द्राम् ।

---

[१] नर्वैरंपक्षणीया । [illegible] [illegible]तां त्यागे । [२] कटाक्षणि [illegible]णि [३] भुवि दिर्व्यां [illegible] [illegible]त्य वयः । न केवलं [illegible]नां किन्तु [illegible]मप्यलभ्यां [illegible]वरणीति यावत् ।

मुहुर्मुहुर्विस्मयहर्षलज्जा-
वशंवदान् विस्तृतधीस्तताान ॥ ३८ ॥

नैयायिका वा निगमान्तलोला
मीमांसका व्याकरणप्रवीणाः ।
विद्वांस एतद्विहिताभियोगा
शिश्यत्वमस्याप्युरपि क्षणेन ॥ ३९ ॥

वैदुष्यकीर्तिं विबुधा यदीयां
विस्तारयन्तो विषयान्तरेषु ।
चिरश्चिरं सारविदो नितान्तं
निर्मत्सरा हि स्वगुणाधिकेषु ॥ ४० ॥

गीर्वाणवाणीमिति सुप्रसन्ना
मेतत्समाश्लेषणतोऽवलोक्य ।
हौणीर्ष्ययेवान्तिकतोऽस्य मन्दं
विन्यस्य विन्यस्य पदान्यचारीत् ॥ ४१ ॥

---

[१] वेदान्तविहारिणः । [२] अनेन सह विवादप्रवृत्ता इत्यर्थः । [३] अन्यदेशेषु । [४] गुणैस्स्वापेक्षयोत्कृष्टेषु समानगुणेष्वेव मत्सरा विदुषां भूषणं भवतीति भावः । [५] हौणी पठितुमारब्धवानिति भावः ।

सुधीमणिस्सोपि समीक्ष्य हार्णां
 वशीचकारादरपूर्वमेनाम् ।
सुधाशनीश्चातनुताग्रजेव
 सहायकर्मेव सदापि तस्याः ॥ ४२ ॥

सुरेन्द्रभाषेति सभाक्तिरेका
 नरेन्द्रभाषेति ससक्तिरन्याम् ।
स लालयन्नास्त चिराय तांस्तान्
 सुहासुवातां च सुहृर्गुणांस्ते ॥ ४३ ॥

सा कैरळी केरळराजवंश-
 शिखामणेस्तस्य हि बाल्यसिद्धा ।
पुपोष काञ्चित् परमां विशुद्धिं
 सुरेन्द्रसूणेन्द्रसरस्वतीभ्याम् ॥ ४४ ॥

अनेकभाषानिपुणोपि सोभू-
 त्रिसृष्वतीवान्तहपाहितात्मा ।
यथा नृपः पंक्तिरथः प्रियासु
 परस्वतासु प्रतिजाग्रतीषु ॥ ४५ ॥

[१] बाल्यादारभ्य तदधीनतया विद्यमाना ।

अधीत्य विद्याः परिशोध्य वादै-
विभूष्य चाचारपरम्पराभिः ।
प्रचारणाय प्रकटीचकार
प्रयत्नमप्येष नयज्ञमौलिः ॥ ४६ ॥

शिष्टादृतां संस्कृतभारतीं ता-
मिष्टार्थदात्रीं त्रिषु विष्टपेषु ।
कष्टां दशां कालवशात् प्रपन्नां
पुष्टानुकम्पोऽभवदीक्षमाणः ॥ ४७ ॥

स पुस्तकं बालविबोधनाख्यं
निर्माय निर्मायसुखाध्वनायम् ।
सञ्चारयन् बालकुलान्यनैषीत्
सारस्वतारोहणसाधुमार्गम् ॥ ४८ ॥

शेषार्यसंज्ञा खलु पाठशाला-
प्यस्योद्यमादेव तदाविरासीत् ।

---

[१] विद्यानामधीतिबोधाचरणप्रचारणैरन्वयं निरन्तरायमक- [illegible] प्रयत्नमित्यर्थः । [२] केरलभाषायां बालबोधनं नाम पुस्तकमनेन निर्मितं वर्तते । तच्च संस्कृतभाषाभिविवक्षूणां बाला-नामत्यन्तोपकारकम् ।

विशेषतो यात्वदिशत्स्वभाजा-
मशेषतस्संस्कृतसारबोधम् ॥ ४९ ॥

अथ क्रमादस्य च शिष्यभावं
गतास्समागत्य सदस्सु राज्ञः ।
विरेजुरत्रानुजभागिनेयौ
सनामकौ तेष्वधिकं व्यभाताम् ॥ ५० ॥

यथा हि शास्त्रौघमतीत्य कार्या-
पर्यैक्षत स्वैरमयं तथैव ।
नृपार्हयानान्यधिरुह्य तांस्तां-
स्तदा तदालोकत भूविभागान् ॥ ५१ ॥

स्थले जले वा विपुले वने वा
हयादिमारुह्य चरन् स धीरः ।
कदापि दासैः परतश्च दाशैः
क्वचित् किरातैस्स्वयमन्वसेवि ॥ ५२ ॥

वनेचरास्तं विपिनोदरेषु
विनेतृभावेन निषादमल्लाः ।

---

[१] तुरगमारुह्य सञ्चरणेन शिक्षानैपुण्यं सम्पादितवान्

विद्धूनतापा विदधुर्विशेषा-
द्विभावनीयान् विविधोपचारान् ॥ ५३ ॥

चरन् स कान्तारपथे कदाचि-
द्विलोभितोऽभूत् सुतरां तटिन्या ।
कयापि कारस्करनाम्नि देशे
गुणेषु लोभो हि गुणिस्वभावः ॥ ५४ ॥

कलाभिरुच्चैरुदयोन्मुखोयं
यतो यतः पादमधाद्थाभूत् ।
ततस्ततोऽतीव तमोवियोग-
स्तथाविधं हि द्विजराजतेजः ॥ ५५ ॥

शास्त्रेषु च न्यायनयप्रयोग-
श्शास्त्रेषु चोच्चैर्निखिलप्रयोगः ।
प्रत्येकमस्य प्रतिपत्तियोगा-
दुपावभूतां बहुकार्यसिध्यै ॥ ५६ ॥

---

1. Kanhirappilli.

[२] द्विजराजस्य च द्रस्य क्षत्रियश्रेष्ठस्य प्रकृतनायकस्य च । तेजः प्रकाशः प्रभावश्च । यथा पूर्णाभिः कलाभिरुदयोन्मुखश्चन्द्रो यत्र यत्र स्वकिरणान्विकिरति तत्र तत्रान्धकारनिरासश्च दृश्यते तथा विविधकलाविशारदोयं यं यं देशमावसत्तत्र तत्राज्ञाननिवृत्तिस्सुतरां समभवदित्यर्थः । शेषाचार्यप्रभावातिशयोप्यत्र कृताधियामूह्यः ।

अखण्डयत् पण्डितवर्यपादान्
सद्रस्तु वाग्गंभीरविशेषदर्पैः ।
वनेषु तु व्याघ्रसुरवांश्च हिंस्रान्
विचित्रसीसास्त्रग णप्रहारैः ॥ ५७ ॥

तैस्तैर्विहारैरिति वीतखेदं
कालं नयत्येव रथे क्षमस्मिन् ।
हा हन्त वंशोत्र विशेषमान्या-
वस्था जं ः परलोकनाशो ॥ ५८ ॥

यावच्चितं दाय कसत्वा-
देत म तु हिताग्रज ा ।
संस्तूय सम्पोष्य रसात् पुरैव
रा ी पद्मास्त्राकमगाद्द्वितीयात् ॥ ५९ ॥

एकस्तु ीस्तत्र हि राजशर्फ
तृतीयभूभृत् पद एव लेभे ।

---

(१) पूर्वमस्य २९ पद्ये विद्यागुरुत्वेनात्तगृह्य यथायं तृतीयराजः
स तद . .६" इत्यन्यादृशी लोकप्रसिद्धि ...श्च ।

अन्योन्यु[illegible] [illegible] शास्त्रे-
[illegible]पुपान्वित् ॥ ६० ॥

तत्रैव [illegible] क्रमेण
[illegible] निपाय् ।
[illegible]
[illegible] ॥ ६१ ॥

अथा[illegible]
[illegible] ।
आ[illegible]
[illegible]राजलक्ष्मीः ॥ ६२ ॥

[illegible]
नृप[illegible] परि[illegible] ।
[illegible]
नि[illegible] ॥ ६३ ॥

---

[१] [illegible] । [२] [illegible] ।
[३] [illegible] D. [illegible] ।

स भूमिपस्त्वाश्रितवत्सलाना-
मग्रेसरोऽथाब्जपादभक्तः ।
प्रहृष्टधीः प्रैक्षत यौवराज्य-
मधिष्ठितं स्वानुजमंघ्रिभाजम् ॥ ६४ ॥

यस्यैव साचिव्यमवाप्य धन्य-
स्स वैष्णवेन्द्रस्तिरुवेङ्कटाख्यः ।
गोश्रीमहीमण्डलराजनीतेः
परिष्कृतौ प्राक् प्रजिघाय दृष्टिम् ॥ ६५ ॥

य एव मातृक्षितिपेषु पूर्व-
माविश्य काशीं कलितोरुपुण्यः ।
प्रत्याजगामाखिलभूमिपेषु
विस्तारयन् भूरियशोविलासान् ॥ ६६ ॥

---

[१] Dewan Thiru Venkitachari स पुराने नूतनपरिष्कारवर्तिषु प्रथमगण्यः । [२] काशी गतो [illegible] गोश्रीनदीशेषु प्रथम एवायं महाराज इति भावः ।

मातुस्सगर्भ्यात्मजमग्रजं तं
महीन्द्रमेषोप्यतिगौरवेण ।
पश्यन्नथोपेन्द्र इवेन्द्रमारा-
न्मुहुस्ससेवे समयानुरूपम् ॥ ६७ ॥

ज्ञानं समृद्धं चरितं विशुद्धं
वपुश्च तद्यौवनमप्यपार्ते ।
विभुत्वमप्यादृशमित्यमुष्मिन्
विशिष्य रेमे चिरतं युवश्रीः ॥ ६८ ॥

स्वयं हि शक्तोऽपि स पार्थिवोऽस्मिन्
गुणानुदारानतुलेनतोऽनन्य ।
दिदेश कांश्चिद्विषयाधिकारा-
नैदासिता कोऽत्र सुपात्रलाभे ॥ ६९ ॥

अथायमन्तःपुरकार्यधुर्य-
पदं समारूढ मुहुः प्रयत्नैः ।

---

[१] युक्तमेवैतन्महाराजेन विहितं इत्यत्र कविहृदयं बोध्यम्

परिष्कृतीस्तत्र विधाय तास्ताः
 प्रसिद्धिमन्यादृशमप्यवाप ॥ ७० ॥

इति क्रमाभीतिषु राजकीया-
 स्वल्प... प्रशंसया श्लाघ्यमाना ।
पपात यत्नेन हि राजलक्ष्मी-
 रसेवतांशेन विशेषतोऽमुम् ॥ ७१ ॥

सरस्वतीस्वैरविहारभूमे-
 श्श्रियं च तां लालयतोऽस्य रागात् ।
प्रिया पदेऽलक्ष्यत पार्वती च
 ययोर्हितं शैल[2]गृहस्थभाग्यात् ॥ ७२ ॥

स्वरूपतो वास्य विभोः प्रियैषा
 स्वभावतो वापि ... श्रुतासि ।
विरूढशङ्कास्सुधियो यथासं-
 स्तथोदजृम्भन्त गुणश्रियोऽस्याम् ॥ ७३ ॥

---

[१] अस्य पूर्वस्मादिणधातोर्भावे क्तः या इत्यर्थः ।
[२] हिमवान् Kunnathu Kittunni Nair इति प्रसिद्धोऽस्याः पितेति च गम्यते । मुखे मुद्गेत्यादि १० पद्योक्तं ... स्वशरीरमन्त्र सुकुटमारोदिति भावः । [३] सौन्दर्यौदार्यादिगुणसंपदः ।

काले चलत्येवमथावनीन्द्रं
हन्ताभ्यभूत् कोऽपि गदोऽचिकित्स्यः ।
द्वारोपरोधः क्व विधेर्हतस्य
नरेश्वरे वाप्यमरेश्वरे वा ॥ ७४ ॥

स तत्र भूमीभृति रूढमूल-
श्चिराय हा मेरुमहीरुहेन्द्रः ।
विधूतशाखः पिटकाग्निकाग्र-
र्बिभेद पादैर्निरगमय्य रुन्धन् ॥ ७५ ॥

तथा व्यथाग्रस्ततनुं विबुध्य
सुधार्मिकं केरळभूतलेन्द्रम् ।
सिन्धूद्धृतं केरळमण्डलं तु
भूयोऽपि मग्नं बत दुःखसिन्धौ ॥ ७५ ॥

स धीः शान्तः क्षितिपालमौलि-
स्त्वमन्तरा मानमजेर्पयित्वा ।
भिषग्वरानन्तरजाधिकारि-
वशेऽतारीद्वपुरेव सर्वम् ॥ ७६ ॥

---

[१] राज्ञि स्वंते च । [२] अवयवशोथः पिटकाय । [३] चरणौ प्रत्यन्तर्वंतात्र । [४] रोगाकुलः ।

अथातुरस्यास्य गुरोस्सदापि
पदान्तसेवी युवराज एव ।
बभार भारं विधृतानुवादो
न योग्यमार्तस्य हि धूर्वहत्वम् ॥ ७७ ॥

आशीर्वादैस्तदनु विविधैर्दक्षिणाभिस्सुतृप्ता
विप्रेन्द्रास्तं विविधविभवैर्भेषजैर्वैद्यवर्याः ।
काले काले निपुणधिषणा मन्त्रिणश्चोपचारैः
क्षोणीनाथं युवनृपमतं स्तुत्यमादृत्य भेजुः ॥ ७८ ॥

एवं पञ्चषवासरेषु गलितेष्वत्यन्तदूरागत-
क्षोणीदेवकुलेषु च प्रमुदितेष्विष्टार्थगोलाभतः ।
सिंहे मासि बतैकसप्ततितमस्याब्दस्य पृथ्वीपति-
स्सोगात् स्वर्गमुपार्जितैस्स्वसुकृतैः प्रद्योतितेनाध्वना ॥

सोयं श्रीरामवर्मा नरपतिरथ तस्योर्ध्वदेहक्रियास्ता-
स्सर्वास्सर्वाधिकारिप्रकरपरिवृतस्सानुगो भागिनेयैः ।
सार्कं निर्वर्त्य नाकस्थितमपि च गुरुं चेतसाऽऽदृत्य पश्यन्
लोकक्षेमार्थमुद्यन् करुणमखिलमान्योग्रहीद्राजलक्ष्मीम् ॥

इति श्रीरामवर्मविजये नव्यकाव्ये
राज्यलाभो नाम प्रथमः सर्गः
॥ समाप्तः ॥

[१] गतेषु । [२] इष्टार्थलाभतो गोलाभतश्च ।

॥ द्वितीयः सर्गः ॥

अथ श्रियं कैरळवर्मणार्पितां
परोक्षरूपेण पवित्रतेजसा ।
स रामवर्मादरतस्समाददे
दिवाकरेणेव दिनात्यये ऽनलः ॥ १ ॥

ततो मुहूर्ते शुभदे स पार्थिवः
किरीटसन्धारणमंगळक्रियाम् ।
चिकीर्षुरारात् कुलदैवतं गुरून्
प्रणम्य गोश्रीपुरगं सदोभ्यगात् ॥ २

सरूपशोभाहृतलोकलोचन-
स्सुवेषरम्यश्श्रितवाहनोखिलैः ।

---

[१] अप्रत्यक्षशरीरेण स्वर्गस्थितेनेति यावत् । [२] स राज्यमित्यादि रघुवंशश्लोकोत्रानुसन्धेयः । [३] गोश्रीपुर एव नाटनृपानां मूलपुरी अत्रैषां किरीटधारणमहोत्सवो निर्वर्त्यते तत्कर्म-मित्यर्थः ।

हृतोऽनुगैर्वीक्ष्य पथिष्वलंकृते-
ष्वमून् भक्तीर्मुमुदे निजप्रजाः ॥ ३ ॥

सदोमुखेऽसाववतीर्य वाहना-
द्यदाविशत्तत्र समं सभासदः ।
समं समुत्तस्थुररं महास्वनै-
र्महत्तमेभ्यो नौविकेभ्य उच्चैः ॥ ४ ॥

अथागतस्तां स न आंगलाधिकृत्
सहानुगन्तोन मुखेश्वरादिभिः ।
उभावथोत्थितिकृत्य सत्कृत-
स्तमासदत् सादरमाशु तत् सदः ॥ ५ ॥

स पश्चिमाशाधिपमण्डलद्युती
निवेशनालक्ष्यवयांगमानुः ।
विनिश्चितो भारतचक्रवर्तिनी-
निदेशकृत् केन न पूज्यते त्विषा ॥ ६ ॥

---

[१] ... सभानायिनः । [२] Cannons ... श्चायं साम्प्रदायिक आचारः । 3. Mr Thomson The Resident of Cochin and Travancore. (4) Queen Victoria,

यथोचितं स्वीयकिरीटधारण-
क्रियानुमोदाय सदम्लदागतान् ।
सहानुगं वीक्ष्य तमेष मानय-
न्नुपागमत् स्वासनमण्डपं नृपः ॥ ७ ॥

महाजनास्ते सकलाश्च सेवितुं
नृपं तमेकं हि सभामुपागताः ।
अयं च तान् प्रीणयितुं कृतादर-
स्समीक्ष्य सिंहासनमर्थितोऽग्रहीत् ॥ ८ ॥

स बालसूर्योपमसुन्दरद्युति-
र्विकासयन् लोकदृगंबुजावलीः ।
विभावयन्नात्मगुरूंस्तदासनं
समारुरोहोदयशृंगसन्निभम् ॥ ९ ॥

अनुज्ञयाथास्य यथार्हमासने-
ष्वथोपविष्टेष्वखिलेषु तत्सदः ।
भटोत्करैः पार्श्वनिबद्धपंक्तिकै-
स्स्थितैस्समाभूष्यत चोद्यतायुधैः ॥ १० ॥

विचित्ररत्नैः परितो विभूषिते
सभोदरेऽस्मिन् सकलाः क्षितीश्वराः ।

न केवलं देवगणाश्च सन्निधिं
व्यधुर्महीशिष्टप्रतिमावपुश्छलात् ॥ ११ ॥

क्वचिन्निषण्णैर्भरतावनीजनैः
क्वचित्सुरोपाह्नतिजैश्च कुत्रचित् ।
विशिष्य सैन्यैश्च विभूषिता तदा
सभाऽवहत् कामपि दर्शनीयताम् ॥ १२ ॥

अथाखिलप्रार्थितमंगलोदय-
स्स मानवेन्द्रस्समये विनिश्चिते ।
श्रियः स्वयं मूर्ध्नि यथावदादधे
किरी[2]टरत्नं हृदि चाखिलेश्वरम् ॥ १३ ॥

तदा स्व[3]विष्णुर्न महीपतिर्भवे-
दिति क्षितीशस्स यथार्थ विष्णुताम् ।

---

[१] सकलभूपानां प्रशस्तदेवानामपि विचित्राणि चित्रफलकान्यत्र संस्थापितानि तन्मूलक एवायं निर्देश इत्यवसेयम् ।

[२] अखिलेश्वरं मौलिरत्नं ध्यायन्नेव शिरसा किरीटं स्वीकृतवानित्यर्थः । [३] "नाविष्णुः पृथिवीपतिः" इति स्मृतिवाक्यमेवात्र प्रमाणम् ।

तथैव तद्दर्शनकौतुकोदया-
दुपागमञ्चाशु नरैर्निवेश्यताम् ॥ १४ ॥

अथ प्रभावाञ्चलतेऽस्य भूपते-
श्श्रियं समुल्लुप्य हि मौनमाश्रिते ।
नृपः स्वकीयं जनरञ्जनोद्यमं
प्रकाशयन् सादरमाददे गिरम् ॥ १५ ॥

कृपाधिका मे गुरवः कुलेश्वरी
स च त्रैयीशो मम चेतसि स्थिताः ।
सतां मते कर्माणि सविनीय मां
सदा नियुञ्ज्युः स्थिरनिश्चयैस्त्वरम् ॥ १६ ॥

त्रिचित्रभक्तांरिकृतरसापक्षं
भ्रमकि वैकोरियलोजितैर्गुणम् ।
मदुक्तमेवृत्तवपन्यगार्थिनै-
रङ्ग्रमस्मादृशभाग्यभूषणम् ॥ १७ ॥

---

[१] आलोकनरसातिशयान्निर्निमेषत्वं देवत्वं च । सिन्धुसन्निधौ हि देवानां सम्मेलनमत्युचितमेवेति भावः । [२] तत्र सन्निहिता पुराणालदेश्वरी तत्कुलदैवतम् । [३] पूर्णत्रयीशः [४] कृपाधिक्यान्नियुञ्ज्युरिति सापेक्षं विश्वसितीत्यर्थः ।

तदप्यमुञ्चन् गुरुमार्गतश्चरन्
  स्वयं च तत्तत्कुशलं प्रवर्तयन् ।
जनप्रमोदाय सदापि जागृयां
  समस्तवर्गेषु समत्वमाचरन्" ॥ १८ ॥

गभीरसारार्थमुदीरयन्निदं
  सुधीरयं सर्वजनाभिनन्दितः ।
प्रसूनदानादिभिरांगलाधिप-
  प्रभून् यथावद्विहितादरोऽधिनोत् ॥ १९ ॥

तदा सदस्यन्मुखरं जयस्वनै-
  र्मुदैककण्ठ्येन विनिर्गतैरभूत् ।
बहिश्च भूपस्तरनाळिकस्वनै-
  र्नृपस्य भाविप्रियभव्यशंसिभिः ॥ २० ॥

अथाखिलाः कृत्यविदोऽभ्यनुज्ञया
  नयांबुधेरस्य ययुर्यथागतम् ।

---

[१] सकलप्रजासु सान्त्वनैव हि नृपाणां शुभिकन्वेगुरुत्वम् ।
[२] नालिकनिर्गतशब्दैः ।

नृपश्रियं तामपि लाञ्छयञ्श्रयं
  पुरीं विशेषाधिकमादृतो जनैः ॥ २१ ॥

गतेऽथ दीक्षां गुरुमेदिनीभरं
  वहन्निवाऽनन्त पार्थिवोरगः ।
शुभेश्वरस्तूत्तमधीस्सहोदर-
  स्य संगमग्रालयमावसत् स्वयम् ॥ २२ ॥

स यौवराज्ये विलसन् हि विद्यया
  गुणैश्च तैस्तैश्चिरमन्यदुर्लभैः ।
स्वपूर्वजं भूपतिमन्वगात् परं
  न तूद्यदारोग्यबलेन वर्ष्मणा ॥ २३ ॥

सगर्भ्ययोरेक उपास्त भूपतिं
  समुद्यतोन्यस्त्वभजद्युवेश्वरम् ।
उभौ च ताभ्यां सहितौ विरेजतुः
  पुरेव सौमित्रियुतौ रघूत्तमौ ॥ २४ ॥

दिने दिने तत्र जगत्त्रयीश्वरं
  पदे स देवेन्द्रसमोऽवनीश्वरः ।

---

(1) Irinjalakuda.

भजन् निजं पालननैपुणं क्रमात्
प्रजासु जातादरमातनोत् स्फुटम् ॥

निजाग्रजेनात्र पुरा विनिश्चितं
वयोधिकं वाप्यवलोक्य मन्त्रिणम् ।
षडाननाख्यामहितं तदा पदा-
न्न चालयामास गुरुप्रियो नृपः ॥ २६ ॥

स्वतूलिकाचालनतः प्रचारय-
त्यशेषकार्याणि विशेषविश्रुते ।
महीश्वरेऽस्मिन् स हि मन्त्रिकुञ्जरः
परं तदा विश्रमसौख्यमन्वभूत् ॥ २७ ॥

अथोत्थितानन्दजनाभिनन्दितं
तमीश्वरं विश्रुतसद्गुणोदयम् ।
शनैरुपागम्य समानधर्मिणी
शरत्समासेवत काशचामरैः ॥ २८ ॥

अगस्त्यसंयोगवशेन[2] निर्मलं
व्यधात्तटाकादिकजीवनं[3] शरत् ।

---

[१] Dewan Subrahmania Pillai. [२] शरदि ह्यगस्त्यनक्षत्रस्योदयात् सलिलमखिलं विमलं सम्पद्यते । [३] जलम् ।

स्वकृत्यनैपुण्यवशेन निश्चलं
व्यधाद्मात्यादिकर्जीवनं नृपः ॥ २९ ॥

अशोपतः पङ्कमशोषयत् क्षितौ
शरत् स्वयं सूरकरप्रसारणैः ।
राजाधिराजस्तु नयप्रचारणै-
रपङ्कतामेष निनाय देहिषु ॥ ३० ॥

अपेतदुर्भिक्षमतोषयज्जनं
शरच्च राजा कुमुदाहितोदयः
द्वयोश्च भूतिः परमीक्ष्यते स्म सा
विशेषतश्चारुसरित्प्रतीरगैः ॥ ३१ ॥

अथैष कारस्करदेशवाहिनी-
तटीनिकेतं प्रतिनिर्ययौ नृपः ।
सहानुगः काननसन्निकर्षतो
विलोभनीयं विविधैः फलादिभिः ॥ ३२ ॥

---

[१] इक्षुगानम् । [२] निर्दोषताम् । [३] शरत्पक्षे लिङ्गपरिणामः कार्यः कुमुदेषु आहतो निहितोऽभ्युदयो यया चन्द्रस्य शरदि सुप्रसन्नत्वादिति भावः । राजपक्षे कोर्भूमेः लक्षणया भूतागिजनस्य मुदे आहितोदयः उन्नतावस्थां प्राप्त इत्यर्थः ।

जलस्थलाध्वोचितवाहनैर्लघु
प्रविश्य तत् स्वायतनं सुशोभनम् ।
नृपस्स्वकीयैः परिवारमण्डलैः
परं तुतोषाभिनिषेव्य तां नदीम् ॥ ३३ ॥

विलोकमात्रेण नृपस्य या मनः
प्रमोदयामास किमेतदद्भुतम् ।
गि[1]रीन्द्रमुख्यस्य वरात्मजा स्वसा-
व[2]नूनपुण्यैकनिषेव्यसद्रसा ॥ ३४ ॥

हि[3]माचलस्थूलशिलाविघट्टनै-
र्विशीर्णकल्लोलविलोलविग्रहा ।
निपत्य या जह्नुसुतेव भूतलं
निरस्तसन्तापमितस्तनोत्यलम् ॥ ३५ ॥

सदानुकम्पाकुलमीनलोचना
सुफेनमन्दस्मितसुन्दरद्युतिः ।

---

[१] सह्याद्रेः हिमवतश्च । [२] सुस्नातिवरिष्ठसंसेव्यनिर्म-
[illegible]सलिला पुण्यवदग्रगण्यानां मुख्यनिषेव्ये शंभौ अप्रतिहतप्रवर्तमान-
रसविशेषा च । [३] हिमाचलतुल्याः स्थूलशिलाः हिमा…
स्थूलशिलाश्च । [४] निरन्तरताख्यं कारुण्यं च ।

समुल्लसत्सत्कमलामलाशया
  नृपस्य मातेव सुखाय साऽभवत् ॥ ३६ ॥

निषेव्य तां तत्र नदीं यथासुखं
  तदाश्रितानप्युपलाल्य जीविनः ।
सहानुगैस्सोऽवनिवल्लभो वस-
  न्महाजनैश्शश्वदसेव्यतागतैः ॥ ३७ ॥

पुरात्र घोरे विपिनोदरेऽचरन्
  महाद्विजाः कञ्चुकिनश्च सर्वदा ।
अधिष्ठिते चाप्यमुनाधुनाऽचरन्
  महाद्विजाः कञ्चुकिनश्च सर्वदा ॥ ३८ ॥

शिवारवः कुत्रचिदत्र विस्तृतः
  कुतश्चिदुद्यन्महिषीकुलोद्यमः ।
करीन्द्रचारोऽन्यत इत्यभूत् पुरा
  नरेन्द्रवासेप्यखिलं तदा बभौ ॥ ३९ ॥

---

[१] अमलकमलोल्लासिनी निर्दोषश्रीसमृद्धा च । [२] वनपाक्षिणः विप्रोत्तमाश्च । [३] वन्योरगाःवेत्रधारिणश्च । [४] क्रोष्टुविरावः मंगळवादित्रादिनिस्वनश्च । [५] वनमहिषसमूहसञ्चारः राजकळत्रपुत्रादिविलासश्च ।

पुराऽधुना चात्र पुराङ्कणेऽचरन्
वनेचरेन्द्रा अपि घातुका मृगाः ।
पुरोद्धतास्स्वैरविहारिणोऽधुना
विनम्रशीर्षाः खलु रूढपञ्जराः ॥ ४० ॥

द्विधा बभुस्तत्र पदार्थसञ्चयाः
क्वचित् सदा जानपदोपदीकृताः ।
अजस्रमन्यत्र वनेचरोत्तमैः
क्षितीन्द्रमोदाय पदान्तिकेऽर्पिताः ॥ ४१ ॥

प्रसाद एतस्य महीभृतां मणे-
र्वनेऽपि नित्यं भवनेऽप्यभूत् समः ।
अनारतं विष्णुपदाहितात्मनो
द्विजेशितुः कुत्र विशेषभावना ॥ ४२ ॥

पुरेत्र ताश्शारदवासरश्रिय-
स्स लाळयन्नेव नयन्नतन्द्रधीः ।
ततान कृत्यान्युचितानि नैव हि
स्थलाद्यपेक्षा सति कार्यनैपुणे ॥ ४३ ॥

---

[१] विष्णुपादार्पितचित्तस्य आकाशदेशविलसद्बिम्बस्य च । [२] क्षत्रनृपाधिपस्य चन्द्रस्य च ।

हिमागमे तद्वनगेहमुत्सृजन्
स्वमूलधामैव जगाम सोऽनुगैः ।
धनागमे हंस इवावनीतलं
विहाय हैमाचलवर्ति मानसम् ॥ ४४ ॥

अथागते मासि तु वृश्चिके शुभे
स पूर्णवेदेशमहोऽखिलादृतः ।
उपागतः क्षोणिपदीपमुख्यकैः
कुतूहलारूढमनोरथं व्यधात् ॥ ४५ ॥

जनेशितुस्तस्य न केवलं मही-
तलस्पृशां सर्वशरीरिणामपि ।
मनस्यभूत् कोपि महारसस्स्वयं
महेत्र मन्देतरमागतेऽन्तिकम् ॥ ४६ ॥

अथ क्षितावादृतवाद्यकोविदाः
प्रशस्तसंगीतकलाविचक्षणाः ।

---

[१] हिमवत्पर्वतमूर्ध्नि वर्तमानम् ।

नरेश्वरा अपि ते च ते स्वयं
जगत्पतेरालयमादरादगुः ॥ ४७ ॥

शनैश्शनैराधुतकर्णमण्डला
जनैर्मुहुस्सादरमुत्सहर्षमीक्षिताः ।
विधूतपक्षाः किमिवाञ्जनाचलाः
पुरेऽभ्यदृश्यन्त तदा महाद्विपाः ॥ ४८ ॥

दिदृक्षया केपि मुमुक्षवोऽपरे
महोत्सवेऽस्मिन् विधृतादरा नराः ।
धनव्ययं वा समयस्य वा व्ययं
तृणाय मत्वैव पुरं तदाययुः ॥ ४९ ॥

महाजना मेरुनिभाकृतस्य तत्
समाययुश्चापि सुहृ[illegible]ः ।
वणिग्वराः पण्यविचित्र[illegible]-
र्विलोभयन्तोऽखिल[illegible]न्यपि ॥ ५० ॥

इति क्रमाद्द्वित्रदिनैरिदं पुरं
निरन्तराक्रान्तमनेक[illegible] ।

---

[१] सूरीश्वरस्य पूर्णत्रयी[illegible] ।

जनोत्करैस्[1]स्वातिशुभर्क्षवासरे
ततस्समारभ्यत चोत्सवो महान् ॥ ५१ ॥

दिनागमेऽश्रूयत तूर्यनिस्वनो,
घनाघनध्वानसहोदरोत्र यः ।
[2]समाजुहावेव मुहुर्दिवौकसो-
प्यशेषनाथोत्सवदर्शनोत्सुकान् ॥ ५२ ॥

निरन्तराः क्षेत्रवराजिरे तदा
द्विपाधिपाः पर्वततुल्यविग्रहाः ।
मदालसाः पञ्चदशाश्रिता बभु-
स्सुवर्णपट्टोज्वलतुंगमस्तकाः ॥ ५३ ॥

शिरस्यथो मध्यगमत्तहास्तिनः
किमप्यशेषाश्चर्यमुदीक्षितं महः ।
यदेत्र दृश्यं प्रतिमावपुर्विभोः
करोति बालार्कमधः स्फुटं द्विधा ॥ ५४ ॥

(१] स्वातिनक्षत्रेणारभ्य श्रावणनक्षत्रेऽयमुत्सवः समाप्यत इति पुरातनोयं सम्प्रदायः। [२] निम्नगशोरारदतां तैसुत्सवं देवानामपि हि स्यादेव। [३] तेजोविशेषेण गौरत्यातिशयाच्च।

सुवर्णदण्डोज्ज्वलचामरैस्तदा
स तालवृन्तैश्च परीतमौक्तिकैः ।
विकासितैश्छत्रवरैश्च पार्श्वग-
द्विपेन्द्रपृष्ठेष्वपि सेवितो हरिः ॥ ५५ ॥

तदात्र वादित्ररवैः प्रहर्षितं
निरन्तरानन्दिजनाभिवन्दितम् ।
तमीश्वरं सेवितुमुच्चचाल स
क्षितीश्वरोपि स्वकसौधमुत्तमम् ॥ ५६ ॥

क्वचित्तदा श्रीबलिदर्शनोच्चल-
द्विमर्दसंभ्रान्तजनौघसंकुलम् ।
क्वचिच्च भूभृद्भटहुंकृतिद्रव-
त्समस्तलोकं परिचुक्षुभे पुरम् ॥ ५७ ॥

भटास्समुद्यन्नलिकायुधास्समैः
पदक्रमैस्ते पुरतोऽस्य भूपतेः ।
परश्शतास्तुंगशिरस्त्रकञ्चुकै-
र्विचित्रिता भीमवपुश्श्रियोऽचरन् ॥ ५८ ॥

---

[१] तदानीं गोश्रीभटानां शिरस्त्राण्यधिकोन्नतान्यासन् ।

ततस्सुवर्णाहितमुद्रकञ्चुकाः
करोच्चलत्खड्गलतोदितत्विषः ।
शुचिप्रभाः केऽपि पुरस्सराः प्रभोः
समस्तनेत्रोत्सवमादधुः जगम् ॥ ५९ ॥

सुवर्णदण्डाञ्चितपाणयः पुन-
र्धरासुराः केऽप्यतिशुभ्रकञ्चुकाः ।
शिरस्सुपावेशितपट्टवेष्टनाः
पुरोऽस्य चेरुः कुतुकप्रदाः परम् ॥ ६० ॥

मनुष्यवाह्यं चतुरश्ववाहनं
मनुष्यनाथोऽप्यधिरुह्य सञ्चरन् ।
मनुष्यलोचनलक्ष्यतामगा-
न्मनुष्यधर्मेव हि पुष्पकाश्रितः ॥ ६१ ॥

अथाङ्कणे पश्चिमगोपुरस्य तं
त्रयीशमासेवितुमागतो नृपः ।

---

[१] सकलजनदर्शनीयत्वम । [२] कुबेरः ।

व्यलोकि दूराद्रजताद्रिसन्निभं
स्वसौधमारुह्य वसन् बुधावृतः ॥ ६२ ॥

श्रियः परं स्वैरविहारमन्दिरं
मुखं दधत् फुल्लसरोजसुन्दरम् ।
मिलिन्दवृन्दाश्रितकान्तिसञ्चयै-
र्विभूषितं श्मश्रुभिरग्रतस्ससमैः ॥ ६३ ॥

विशालफालस्थलविस्फुटोल्लस-
द्विभूतिरेखाञ्चितयेन पश्यताम् ।
त्रिवर्गमार्गाचरणोत्थितां शुभ-
प्रसिद्धिमुच्चैः कथयन्निवात्मनः ॥ ६४ ॥

प्रलम्बबाहुद्वयमम्बरश्रिया
विभाव्यमध्यं सुविशालवक्षसम् ।
मुकुन्दभक्त्यानतशीर्षमीश्वरं
तमक्षिपुष्पैश्चिरमार्चिचन् जनाः ॥ ६५ ॥

श्रियाञ्चितश्शिष्टजनावनोद्यतः
शिवप्रियश्शिक्षितसद्गजाश्रयः ।

---

[१] निर्मलवस्त्रशोभया तनुत्वादाकाशकान्त्या च । [२] मंगळप्रियः शङ्करप्रियश्च । [३] सुशिक्षितानां गुणोत्कृष्टगजश्रेष्ठानामाश्रयः तादृग्विधगजेन्द्रमूर्धारूढश्च ।

नृपा हरिश्चात्र महोत्सवेऽखिलैः
पृथक्कृतौ सेवकसेव्यभावतः ॥ ६६ ॥

नृपालरूपं तदुदीक्ष्य दुर्लभं
विलोचनासेचनकं[1] महाजनः ।
अमन्दमानन्दमविन्दतोच्चकै-
र्यथैव संवीक्ष्य महोत्सवं हरेः ॥ ६७ ॥

महोत्सवेनोत्सुकमानसास्ततो[2]
महीश्वरानन्तरजा महात्विषः ।
सहानुगैस्सौधवरेषु रेजिरे
परं द्विधा[3] विष्णुपदाहिताश्रयाः ॥ ६८ ॥

नृपाङ्गनाश्चापि समं कुमारकै-
रनर्घरत्नोज्ज्वलभूषणाञ्चितैः ।
समागतास्सौधवरानथाऽवसन्
विमानराजानिव देवयोषितः ॥ ६९ ॥

१] "तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात्" इत्यमरः । [२] प्रसितोत्सुकाभ्यां तृतीया च । [३] सौधानामौन्नत्यातिशयादाकाशस्थिताः लक्ष्मीरमणचरणयोश्शरणागताश्च ।

तदाङ्कणे क्षेत्रवरस्य दक्षिणे
[1]सरूपसौधावलिरुल्लसद्रुचिः ।
अधिष्ठिता सावनिभृज्जनैरभू-
[2]न्महोत्सवायोत्सवदर्शिनामपि ॥ ७० ॥

इति विविधविलासैर्वीक्षणीयार्थजालैः
श्रुतिमधुरगभीरैर्वाद्यघोषैर्विचित्रैः ।
क्वचन मनुजसंघा रेमिरेऽन्यत्र हृद्य-
प्रतिनवमधुरान्नप्राज्यभोज्यार्थजातैः ॥ ७१ ॥

[3]सद्वृत्तश्लाघनीया सरसगुणविला-
साश्रिता साधुसेव्या
सद्यस्संप्रीतिदात्री सविधपदजुषां
सत्कवीन्द्रोक्तितुल्या ।
श्रीपूर्णत्रय्यधीशोत्सव इह खलु सा
भोज्यलक्ष्मीर्धरित्री-

---

[१] समानरूपाणां सौधानां पंक्तिः । [२] तद्दर्शनं सकलजनानामप्यविकलकुतूहलावहमिति भावः । [३] कैरळ्यां "नम्पटा" ख्यया व्यवह्रियमाणैरुपदंशविशेषैः उपजात्यादिवृत्तैः सदाचारैश्च । [४] पाचकाः लालित्यादयः सौराज्यादयश्च ।

वास्तव्यानां हि सत्राशनसुखमखिलं-
प्राणिनां संविधत्ते ॥ ७२ ॥

श्रीबलावत्रासितेऽथ सादरमनेक-
वेषत उपागता
गायकाः क्वचन नर्तकाः कुहचिदिन्द्र-
जालकखितोद्यमाः ।
व्याविहारचतुराः परत्र परहर्ष-
विस्मयपयोनिधौ
प्लावयन्ति सकलान् स्म तत्र दिवसेन
हन्त निमिषायितम् ॥ ७३ ॥

प्रदोषसमये ततः प्रकटमन्द्रतूर्यध्वनिः
प्रभोः पुरत उच्चकैस्समुदजृंभताथोज्ज्वलाः ।
प्रदीपनिकराः परश्शतसहस्रसमुद्दीपिताः
प्रकाशितदिगन्तराः पुरमभूषयन् श्रीपतेः ॥ ७४ ॥

---

[१] दिव्यसुखं असाधारणसौख्यमिति यावत् अत्र भोज्यलक्ष्म्यास्साधर्म्यं राज्यलक्ष्म्यामप्यवगन्तव्यम् ।

अन्तर्बहिश्च भगवन्निलयस्य तावत्
कोलाहलस्समुदजृंभत कोप्यभङ्गः ।
आध्मातशंखपटहादिभवः प्रदीपै-
राराधने मधुजितस्सपदि प्रवृत्ते ॥ ७५ ॥

साक्षात् सर्पेन्द्रतल्पे सुरुचिरसुषुमे
सन्निषण्णं समुद्य-
द्रत्नाभैस्तत्फणाग्रैरुपरिपरिधृतै-
रात्तचित्रातपत्रम् ।
संफुल्लास्याब्जमाराद्भयवरदमु-
द्रारिशंखाङ्कपाणिं
भक्तार्तिच्छेदिपादांबुजमजितमथ
प्रेक्ष्य सर्वे प्रणेमुः ॥ ७६ ॥

ततस्तन्त्रिक्षोणीसुरकुलवरेणोरुतपसा
कृते पूजाकर्मण्युचितविधिनाशेषमहिते ।
पताका श्रीजानेः पुरत उदितोच्चैःकळकळं
ध्वजाग्रे सौवर्णे सपदि निहिताऽलक्ष्यत जनैः ॥

हरिनामकीर्तनरवेण तदा सुधियां
जयघोषनिस्सरणतोऽनुपदं तदभूत् ।
पुरमेव शब्दमयमुत्सव एष तथा-
विधभूम्निभवतुलो भुवने जयति ॥ ७८ ॥

क्षेत्रस्य दक्षिणगतोन्नतसौधराजि-
स्साथोज्ज्वलस्फटिकवर्तिजतुप्रदीपैः ।
सोमोपमैश्च सरसैर्गुळिकासहस्रै-
स्तारोपमैश्च गगनाङ्गणवद्विरेजे ॥ ७९ ॥

क्वचित् कथाप्रपाठतः प्रसिद्धपण्डितास्तदा
क्वचित् स्वगीतचातुरीप्रसारतश्च गायकाः ।
विचित्रनर्तनोद्यताः परत्र दण्डघट्टन-
प्रशस्तकेळिलम्पटा जनप्रमोदमादधुः ॥ ८० ॥

प्रपूजनविधेः परं तदनु पूर्णवेदेशितुः
प्रभात इव विस्तृतोऽश्वगजादिलिश्श्रीबलिः ।
प्रहर्षभरमातनोत् प्रकटदीपिकाळिस्फुरत्
प्रभापटलत्रासराथितनिशीथिनीको नृणाम् ॥

कथाकेळीलोलाः कतिचन ततो नाटकपराः
परे मोहिन्याळीनटनसरसा रात्रिमनयन् ।
परं विस्मृत्यैवोत्सव इह तु निद्रां मुरजितो
निषेवार्थं भक्त्या भुवि किमनिमेषाश्च मिळिताः ॥

ज्येष्ठोत्सवस्य दिवसेऽत्रे पुनः प्रवृत्ते
मत्तेभमर्दिकुतुकाकुलमर्त्यलोके ।

१] ज्यैष्ठनक्षत्रादिने तु पूर्णत्रयीशस्य प्रस्थानघोषस्सविशेषं स-द्भिः प्रस्तूयते । [२] अस्मिन् महोत्सवे ।

पद्भ्यामुपेत्य निशि विश्वपतिं नृपोपि
भक्त्योपहृत्य च नेवार्थमभूत् कृतार्थः ॥ ८३ ॥

एवं वासरसप्तकेथ गलितेऽष्टम्यां निशायां विभो-
राराभिर्गमनोद्गतः कळकळो दिक्चक्रमक्षोभयत् ।
यस्यासीत् प्रशमश्चिरात् पनसवाप्यंभोभिषेकार्चन-
प्रत्यायानविशेषघोषविभवस्यानन्तरं श्रीपतेः ॥

विचित्र[२]पट[३]कोज्ज्वले पुरवरेथ पूर्णेशितुः
प्रवर्तित उदित्वरोत्कटरसोन्त्सदीपोत्सवः ।
तथाविधमहामहे विधिवदेव निर्वर्तिते
प्रथामपि कृतार्थतामनुपमां नृपोप्यन्वभूत् ॥ ८५ ॥

इति श्रीरामवर्मविजये नव्यकाव्ये देवोत्सवो
नाम द्वितीयस्सर्गः समाप्तः ॥

१] 'Puthan' इति कैरळ्यां व्यवह्रियमाणो द्रविणांशविशेषः स एव राजकीयत्वेन गोश्रीराज्ये सुचिरं प्राचरत् पुनरविश्वास्यत्वाद-नेनैव महाराजेनैष निर्मूलमुन्मूलितोभूच्च। (२] अस्यां तु रात्रावत्र तत्र तत्र विचित्रवस्त्रादिभिस्तत्क्षण एव विरचय्यालंकृतेष्वत्यन्तरम-र्णीयेष्वाविर्भूतकायमानेषु विस्तृतविविधोपहारसमर्पणेन पुरवासिभिः पूज्यतेऽयं पूर्णत्रयीशः । [३] वस्त्राणि पटक्काख्यया कैरळ्यां व्य-वह्रियमाणाः कृशानुसंयोगाच्चटचटशब्दानुद्गिरन्तोऽग्निचूर्णगर्भाः के-चिद्वार्तिविशेषाश्च ।

॥ तृतीयः सर्गः ॥

कृतविष्णुपदोत्सवः क्रमा-
दुदयं प्राप्य तथोन्नतोन्नते ।
पथि पादमथार्पयन् स्वयं
भुवि राजा विरराज कोऽप्ययम् ॥ १ ॥

अचिरेण च विस्मृतं व्यधात्
स्वगुणैः पूर्वजमेष मानुषः ।
स्वयमात्मनि तु स्मरन् सदा
सकलं कर्म ततान सात्विकः ॥ २ ॥

वचसा च मृदंगनिस्स्वनो
महसा चोचितवर्णहारिणा ।

---

[१] पूर्णत्रयीशायतनं आकाशं च । [२] आविर्भावं अभ्युदयं च । [३] क्रमेणोन्नतपदाविमलं कुर्वन् किरणं प्रसारयंश्च । [४] भूमीश्वरः चन्द्रश्च । [५] मृदंगस्येव निस्वनो यस्य शब्दस्य मृदंगसाम्यं तूत्तमप्रकृतिलक्षणम् । [६] मनोहारित्वं तच्चोचिताक्षरप्रयोगसंगवर्णवैचित्र्य [illegible] ।

स जगाम सदोपसेव्यतां
   सुहृदां चासुहृदामवीक्ष्यताम् ॥ ३ ॥

अहितानखिलान् स केवलं
   प्रथमोपायगुणोपयोगतः ।
प्रणतानतनोत्त्रयः परे
   प्रथमासाध्यपदोचिताः खलु ॥ ४ ॥

हृदि निष्ठुरवैरदूषिता
   श्शिरसप्यस्य पदान्तमागताः ।
परिपीय वचस्सुधां विभो-
   रथ पूतात्मकतामगुः खलाः ॥ ५ ॥

अतनोन्मनासि क्षितीश्वरो
   यदिदं मन्त्रिवरोपि नाभ्यवैत् ।
सकलार्थविचारचातुरीं
   व्यतरन्नस्य हि शास्त्रसूक्तयः ॥ ६ ॥

---

[१] विशुद्धमानसत्वम् । [२] नाज्ञानात् अनेनास्य संवृतमन्त्रत्वमुक्तम् ।

स हि पौरजननायकः प्रभु-
स्स्वगुरौ प्रागपराद्ध इत्यतः ।
बहुधापि कृताश्रयोद्यमो
न नृपेण स्वयमन्वगृह्यत ॥ ७ ॥

स तु धिक्कृतकिङ्करेश्वरो
धनपुष्ट्याप्यतिकष्टमन्वभूत् ।
क्व इहास्त उदस्तदुर्दशा-
स्सुकृतिस्वामिनि विप्रियं चरन् ॥ ८ ॥

निजपूर्वजपादसेविन-
स्सकलानेव विशेषभावनैः ।
मुदितानतनोदयं यथा
हृदि तापानखिलांश्च न जहुः ॥ ९ ॥

एष एव विशेषवत्सलो
मयि सत्येवमयं स[illegible]ः ।
करुणार्द्रधियोऽस्य तु प्रभो-
स्समतैव परा सवर्गिणि ॥ १० ॥

---

[९] [illegible] निर्यातस्ये-
[illegible] तद्भवत्या-
[illegible] ।

जननीमिव सोऽयमग्रजा-
स्सकलाश्रोपगतः कृतादरः ।
समये समये निषेव्य तन्-
कुशलान्वेषणतोऽधिनोत् कुलम् ॥ ११ ॥

अथ मासि तु चापनामके
सदसि प्रीणितपण्डितोत्करः ।
जननर्क्षदिने जनाधिप-
स्सुजनान् दानशतैरतोषयत् ॥ १२ ॥

अयने पुनरुत्तरे क्रमा-
द्वनीतागति चांशुमालिनि ।
निरगादिह चूर्णिकापगा-
तटगं सौधवरं स भूपतिः ॥ १३ ॥

यमुपेत्य महाजनोऽवनौ
निजतापान् विजहाति दूरतः ।

---

[१] प्रत्यब्दमत्र महाराजस्य जन्मर्क्षमासे विद्वत्सदः प्रवर्तते यत्र हि [illegible] पण्डितवरिष्ठास्संभाव्यन्ते च यथोचितं वित्तार्पणादिभिः । [२] The river of Alwai.

स च तापविमोचनाय तां
सरितं हन्त सिषेविषुर्ययौ ॥ १४ ॥

सचिवादिजनैस्समेत्य नौ-
शतकेनागतमुल्लसद्रसा ।
समवेक्ष्य नृपं तमादरात्
सहसेवोत्थितिमातनोन्नदी ॥ १५ ॥

पुरमेत्य तदा वसंस्तया
सरिता सेवितयाभिऽहर्षितः ।
स कदाचन सौधजालत-
स्सरसं वीक्ष्य ननन्द तां नृपः ॥ १६ ॥

तरळोर्मिविशेषचिह्निका-
श्चितलोलासितमीनलोचना ।
शुचिसैकतशोभनांबरा
सरिदेषाऽत्र न केन लाळ्यते ॥ १७ ॥

---

[१] उच्चलत्सलिलप्रवाहा उदयदानन्दनिर्भरा च ।

शिरसा सुरवाहिनीं वह-
न्नपि गौरीपतिरेत्य यां स्वयम् ।
विहरत्यधिरूढमध्यभू-
र्विषये क्वापि खलूदयद्रसः ॥ १८ ॥

भगवान् स हि शङ्कराख्यस-
द्गुरुवर्योऽपि यदीयरोधसि ।
अवतीर्य कृतार्चनोऽखिलै-
स्सुजनैः प्रागपुनान्महीतलम् ॥ १९ ॥

भक्तालिळितसारसद्रसा-
ऽङ्कनाधापहृतावपि क्षमा ।
अकलाङ्कणगाऽस्य सातपो-
द्भवतापं सुतरामपाकरोत् ॥ २० ॥

सविधेऽमृतसेचनैस्सुखैः
पवनैस्सैकतविस्तृतिश्रिया ।

---

[१] सरित्प्रवाहमध्य एवात्र शिवालयस्थितिः । [२] देशे । [३] अत्रत्यनदीजलस्य पापविनाशकत्वम् रोगनिवारकत्वम् सन्तापसंशमनत्वं च लोकप्रसिद्धम् ।

अखिलाश्रितहर्षदायिनीं
सरितं तामभिनन्द्य सोऽवसत् ॥ २१ ॥

निजशीकरशीतलोदरे
निकटागारवरे निषेव्य सा।
निशि चाह्न्यधिनोदतीव तं
निखिलातङ्कनिवारिणी नृणाम् ॥ २२ ॥

इति तत्र वसन् सरित्तटे
क्षितिपालस्सकलाभितापिनम्।
अपि तीक्ष्णमृतुं रसादसा-
वभिनन्दन् दिवसान्ययापयत् ॥ २३ ॥

वृषमासदिनेषु केषुचित्
गलितेष्वेव घनोदयेन सः।
गुरु[2]मासमहाग्रगामिना
सहसागत्य पुरीमनीयत ॥ २४ ॥

[१) वर्षारंभेण। [२] परेतस्य महाराजस्य दीक्षावसानोत्सवमसिंहे मास्यागमिष्यंस्तस्याग्रगामिना वर्षावसरेऽत्र वासो न सुखायेति निश्चित्यैव स्वपुरीमेवागच्छदित्यर्थः। तत्र गत्वैव निर्वर्तनीयस्यावश्यकार्यस्य गौरवसम्पत्त्यनेन विशेषणेनोक्तं खलु।

स च मासमहामहागम-
   स्समयोप्येष घनोदयाश्रितः ।
अधिकेरळभूतलं जना-
   नखिलानप्यधिकोत्सुकान् व्यधात् ॥ २५ ॥

गुरुमासमहोद्यतं नृपं
   तमवेक्ष्येव निषेवितुं रसात् ।
सकलार्थसमृद्धिमावहन्
   घनकालस्स ततो व्यजृंभत ॥ २६ ॥

तरणिर्गगनाङ्कणे तदा
   न कदाप्यैक्षत वारिदाळिभिः ।
स्नपिते तु वसुन्धरातले
   पथि सर्वत्र सदाप्यवैक्ष्यत ॥ २७ ॥

जडता भृशमंबुदोदयै-
   र्जनतायामुदपादि वर्ष्मसु ।
हृदयेषु तु पार्थिवाज्ञया
   जनितोऽभूज्जडताविपर्ययः ॥ २८ ॥

---

[१] सूर्यः नौश्च । [२] जाड्यं आलस्यमिति यावत् ।
[३] उत्साहः ।

अथ तावदेककवाटैः
प्रविधया विविधाः परीक्षिताः ।
पुरि नागरिकैर्नवाः सं-
निहिता [illegible] ॥ २९ ॥

[illegible]ऽथ महागृहावलिः
पुरि तस्यां तु महाग्र्यशंसिनी ।
परिवारितवर्षवारि या
पृथिवीमेव नु रोद्धुमुद्यता ॥ ३० ॥

विहितावरणां पुरीं तदा
महितागारशतैर्नवैर्नवैः ।
नृपशासनतो घनाघना
अपि न स्प्रष्टुमलं जलांशकैः ॥ ३१ ॥

इति पङ्कविलेपलोपनो-
ल्लसितेऽस्मिन्नचिरात् पुरोदरे ।
पदमापुरितस्ततो हृताः
फलपत्रादिपदार्थपंक्तयः ॥ ३२ ॥

---

[१] तत्कालविरचितानामतिविपुलालयानां पङ्क्तिः ।

केदळीफलसन्ततिस्ततः
   परिपक्वामृतसारसम्पद्ः ।
किमु चोरणतो नृपानुगै-
   स्तरसानीयत बन्धनालयम् ॥ ३३ ॥

निलयावलिराबभौ पुनः
   कदळीपक्वफलैर्विलंबिभिः ।
कनकाभरणैरिवाश्रिता
   नयनानन्दविधायिनी नृणाम् ॥ २४ ॥

दधिकुंभशतानि पंक्तिशः
   पुरसीमस्ववहन्महाप्रभोः ।
विहृतोदयपागमिष्यतः
   पुरतो मंगळपूर्णकुंभताम् ॥ २५ ॥

इतराणि च तानि तान्यत-
   श्शुभवस्तूनि नृपाधिकारिभिः ।
श्रुतमान्यमुपाहृतान्यथो
   व्यलसंस्तत्र महागृहोदरे ॥ ३६ ॥

---

[१] पक्वानि तु कदळीफलान्येतादृशोत्सवेषु कमप्याल-यमानीयानिबध्य स्थाप्यन्ते ।

अखिलेन्द्रियतर्पणोचिता-
स्सकलार्था अपि तत्र संभृताः ।
इति यत्तदनुज्झितार्थकं
पुरमालक्ष्यत पूर्णसंज्ञकम् ॥ ३७ ॥

इति सज्जितसर्वसाधन-
स्स हि मासाख्यमहस्समासदत् ।
नृपमन्त्रिनिमन्त्रिताखिल-
प्रभुविप्रादिजनैस्समं पुरीम् ॥ ३८ ॥

महिताढ्यमहीसुरोत्तमान्
विविधांश्चात्र समागतान् प्रभून् ।
उचितावसथार्पणादिभि-
स्सदकुर्वन् सचिवास्समन्ततः ॥ ३९ ॥

अथ सिंह इति प्रथां गत-
स्स हि मासो नृपसिंहसौहृदम् ।
अभिलक्ष्य तु वर्षदुर्दिना-
न्यखिलोन्[illegible]करोत् ॥ ४० ॥

---

[१] सिंहे मासि तु विरळान्येव हि दृश्यन्ते प्रायेण दुर्दिनानि ।

परितः स्फुटमातपे दिवा
निशि दीपप्रकरेष्यथोज्ज्वले ।
दिवसैकमयस्समास इ-
त्यदधुः प्रत्ययमत्र देहिनः ॥ ४१ ॥

दिवसत्रितये स मध्यतो
हरिमासो नृपमासजोत्सवः !
न पुरीं परितोखिलां मही-
मपि सन्तोषमयीमथ व्यधात् ॥ ४२ ॥

प्रथमे दिवसेत्र संगता
जनता प्रातरुपाहिताशना ।
मुमुदे किल नाकवासिनो
विहसन्तीह महे त्वनागतान् ॥ ४३ ॥

निशि सद्य उदित्वरादरैः
पुनरस्ताशमथाशितं जनैः ।

---

[१] त्रिभिरेव दिवसैर्निर्वर्त्यतेयं मह इत्यनूतनोयं सम्प्रदायः । [२] मासस्य मध्यकाल एवासीत् सोयं महोत्सवः। [३] सिंहमासः।

अखिलेष्टपदार्थसेविनां
　कथमाशा समुदेति जीविनाम् ॥ ४४ ॥

अपरेद्युरुषस्यथो महा-
　नळिकेभ्यो निरगुर्घनस्वनाः ।
य उपेत्य जगत्यशेषतो
　जुघुषुर्मासमहस्य वैभवम् ॥ ४५ ॥

विहिताभिषवः क्षितीश्वरो-
　प्यथ कृत्यं नियतं विधाय सः ।
प्रविवेश पितृक्रियोचितं
　सदनं वैदिकवर्यभूषितम् ॥ ४६ ॥

महितानि च तानि तान्ययं
　पितृकर्माणि पुरोहिताहतः ।
अतनोदनुसृत्य पद्धतिं
　निजपूर्वाचरितामतन्द्रधीः ॥ ४७ ॥

कतिचित् क्षितिदेवसत्तमान्
　स तदात्मादरतस्समर्चयन् ।
उपभोज्य हिरण्यदानतः
　परितुष्टान् व्यतनोद्विशेषतः ॥ ४८ ॥

करणीयविधेरनन्तरं
धरणीदेवपदाङ्कणे नृपः ।
गुरुभक्तिभराकुलोंगकै-
र्भुवमष्टाभिरुपानमत् स्पृशन् ॥ ४९ ॥

पृथिवीपतिमूर्जितश्रियं
प्रथितं पौरुषवीर्यसद्गुणैः ।
तमवेक्ष्य पदानतं द्विजै-
र्ध्रुवमज्ञायत नाशिषः पदम् ॥ ५० ॥

कृतकृत्यतयोत्थितः पुन-
स्स नरेन्द्रास्त्विह सद्मभोजिनः ।
परिपूर्णमनोरथान् व्यधा-
न्न हि भोज्यैः परमन्यथो धनैः ॥ ५१ ॥

स महान् पुरि तत्र जृम्भितो
महकोलाहल उच्यते कथम् ।
[illegible] जनैः
परिकीर्णैर्वि[illegible]षु देहिषु ॥ ५२ ॥

[१) भूमिदेवान्

विविधा मधुराम्नसम्पद-
स्समये वीक्ष्य तदाभ्युपाहृताः ।
कुतुकाकुलचित्तवृत्तिकै-
रपि चण्डालकुलैरभूयत ॥ ५३ ॥

पशुपक्षिगणाश्च तद्दिने
परितः पार्थिवसद्मभोजनैः ।
परितुष्टधियोऽभवन् यथा
भुवि यज्ञोऽधिकृतैस्तथा कृतः ॥ ५४ ॥

निशि तत्र तु संघभूसुरा-
नवनीपालमणिर्विशेषतः ।
शुभपादचतुष्टयक्रिया-
निरतान् वीक्ष्य धनादिनाधिनोत् ॥ ५५ ॥

द्विजभोजनपंक्तिमागतो
निजमौदार्यमथ प्रकाशयन् ।

---

[१] चण्डालकुलानामपि तस्मिन् दिने मृष्टान्नभोजनं सुलभमभूदित्यर्थः । [२] ईदृग्विधमहोत्सवेषु पादचतुष्टयाख्या काचिद्वैदिकाक्रिया केरळेषु निर्वर्त्यते । तदधिकारिणस्तु संघभूसुरा इति व्यवह्रियन्ते च ।

स रराज कृतादरोऽचिरा-
 दुचिताचारपरो नराधिपः ॥ ५६ ॥

समयेऽत्र समागतं स ये
 तमवेक्ष्यानघदर्शनं द्विजाः ।
अभवन्ने निमेषवृत्तय-
 स्स हि गोक्षीरमणोनघाश्च ते ॥ ५७ ॥

निजगोरसतोऽखिलाशयान्
 मदयन् निस्तुलवृत्तवैभवः ।
द्विजराज इवाखिल द्दत-
 स्सुखमाधात् स हि भोजनोत्सवः ॥ ५८ ॥

अथ संघविहारविस्तरे
 विहितेऽस्मिन् विविधोपदार्पणात् ।

---

[१] एतन्महनिर्वर्तकेन द्विजपंक्तावग्रत एवोपविश्य तेभ्य-स्सकलभोज्यवस्तुजातं दापयितव्यं तैस्सहभोक्तव्यं च अयमेवात्रो-चिताचारः । [२] सुकृतिनां हि विष्णुदर्शनेन देवत्वं सुलभम् । [३] क्षीरादिः वाक्चातुर्यं किरणाह्लादसश्च । [४] पप्पटाख्यः उ-पदंशविशेषः राजकृतं वर्तुलत्वविलासश्च । [५] मन्तुवभूषः चन्द्रश्च ।

नृपमन्दिरगतादृश्यभूसुर-
प्रवरैः क्वापि कृतार्थता धृता ॥ ५९ ॥

विहृताविह नाट्यविश्रुताः
कतिचित् कञ्चन नाट्यकोविदाः ।
कृष्णगानविचक्षणाः परे
निशि तस्यामखिलानरीरमन् ॥ ६० ॥

तदनन्तरवासरेऽप्यथ
प्रथमेऽह्नीवमहे प्रवर्तिते ।
धरणीरमणस्ववोन्मुखै-
रजनीहाखिलमर्त्यमण्डलैः ॥ ६१ ॥

कति [illegible] घन[illegible]नल्पं
[illegible]तोव् [illegible] मह [illegible]गतः ।
क्व नु ता मह [illegible]
[illegible] जुजुषे [illegible]ैः ॥ [illegible]२ ॥

इति लोकविरोगविश्रुतं
महितं मासमहं समाप्य तत् ।

निजगेहनिर्गतैरमुष्मात्
सुहृदां समभावयत् सुधीः ॥ ६३ ॥

स हि[१] कैनुगगारवैदिक-
स्तनयः कृष्ण इति प्रकीर्तितः ।
विदुषां मणिरासनांस्तदा
करयोः काञ्चनपात्रभृत्सतो ॥ ६४ ॥

वयसा तपसा च विद्यया
प्रतिकृष्टस्य हि नव्यगोष्पतिः ।
क्षितिहृत्प्रजितेनमर्चित-
स्सवसीत्यानुहेतुः[२] परं बुधाः ॥ ६५ ॥

इतरे च यथोचितं द्विजाः
प्रभवश्चाधिकृताः कृतादराः ।
अधिगम्य नरेन्द्रसत्क्रियां
जहृषुस्तत्र कृताधिका गताः ॥ ६६ ॥

---

[१] केरळविश्रुतवैदिकगृहेष्वेकं "कैनुक" इति सुप्रसिद्धम् । [२] यथा वा गाण्डीवविजयेण विदीपत कुसुमे ...नां, तथैवास्मिन् भूमीन्द्रेणैवं सत्कृते विद्वज्जनानां सन्तोषातिशयोऽभूदित्यर्थः

अतिगूढस्मितः कृतागसः
कुधियः केचिदुदूढविस्मयाः ।
अविळंबमयातुरात्मन-
स्युचितं दण्डमधीश्वरात् क्षितेः ॥ ६७ ॥

नृपशक्तिरियं तु निस्तुले-
त्यलमुद्घुष्य जनाः प्रतस्थिरे ।
नृपतिस्तु जगत्त्रयीपतेः
करुणैवेयमिति व्यचिन्तयत् ॥ ६८ ॥

निगमेश्वरपादपद्मयोः
स्वत एव तुलभक्तिको नृपः ।
नियतं विदधे ततः प्रभृ-
त्यखिलोलभूपरायितं मनः ॥ ६९ ॥

इति त्रिविधजनौघानन्दिमत्सार्थधान-
प्रतिमवनजलक्ष्मीलाळनाचारिताध्वर्यम् ।
किमपि मनसि कुर्वन्माटभूमण्डलाब्ज-
द्युमणिरखिलामपि ला[illegible] स्म ॥ ७० ॥

इति श्रीरामवर्मविजये [illegible]काव्ये
मासविलासो नाम तृतीयस्सर्गः
॥ समाप्तः ॥

॥ चतुर्थः सर्गः ॥

मासे तस्मिन् मोदिताशेषलोक-
हर्षांशान् सोयं रामवर्माबुवाहः ।
भूमीचक्रे नूतनैर्नीतिवर्षैः
क्षेमाधानं कर्तुमभ्युद्यतोभूत् ॥ १ ॥

सुब्रह्मण्यं माक्तनं मन्त्रिवर्यं
विश्रान्त्यर्थं वेतनेनानुगृह्णन् ।
तत्स्थाने च स्वेच्छयैवानघद्रा-
गाचार्यं तं राजगोपालसंज्ञम् ॥ २ ॥

योऽसौ [illegible] शासने हूणराज्याः
[illegible]धिकारः ।

---

[१] मासमहोत्सवे सिंहमासे न । [२] Dewan Rajagopalachary. (3) He was then the Assistant Collector on British Service.

कीर्तिं नीत्योपार्जयन् पूर्वमेव
क्षोणीशस्यास्याधिकर्णाधिपोऽभूत् ॥ ३ ॥

सोयं धीमान् सत्परिष्कारतन्त्र-
ज्ञानांभोधिस्तां महीभर्तुराज्ञां
मूर्ध्नादाय प्रेक्ष्य राज्यं समन्ता-
चैस्तैर्यत्नैस्तन्नवीकर्तुमैच्छत् ॥ ४ ॥

उत्कोचादानादिदुर्वृत्तिलोलान्
नित्यं नित्यं वैपरीत्येप भृत्यान् ।
कांश्चिद्दण्डैश्शोधयामास योग्यैः
कांश्चित्स्थानात् भ्रंशयामास धीरः ॥ ५ ॥

राज्ञादिष्टस्यास्य मन्त्रिप्रवीर-
स्याज्ञारूपे दुर्निवारे समीरे ।
वाति स्वैरं सुस्थिरास्साधुशैला
वीक्ष्यन्ते स्मासद्द्रुमा भग्नशृंगाः ॥ ६ ॥

---

1) Brileery

वीरस्सोयं वीक्ष्य वेगेन तांस्तान्
क्षोणीभागान् जीर्णगेहद्रुमाणाम् ।
मूलोद्धारैर्दूरतो राजमार्ग-
श्रीविस्तारैस्सुप्रकाशान् व्यतानीत् ॥ ७ ॥

एवं प्रायैर्भूमिरक्षानुकूलै-
र्नानायत्नैस्साधुभिः स्तूयमानः ।
सोयं गोश्रीराजवर्यप्रसादात्
सार्थां चक्रे राजगोपालसंज्ञाम् ॥ ८ ॥

लोकश्लाघ्यैर्मन्त्रिणस्तन्त्रभेदै-
स्सन्तोषोऽयं भूपतेर्जृम्भमाणः ।
हा हन्त स्वीयानुजाकालमृत्यु-
प्रस्तुत्यभेनाधिना बाधितोभूत् ॥ ९ ॥

को वा नित्यं चेतसि स्वस्थवृत्ति-
र्दैवायत्तं सौख्यदुःखादिकं हि ।
भूपस्सोऽपि बाधितो यौवराज्या-
रूढ आस्य भ्रातुरैकात्म्यभेन ॥ १० ॥

---

[१] राज्ञो गां वाचं आज्ञारूपां चापालयतीत्येतत्संज्ञाया-
स्सार्थकत्वम् । [२] भ्रात्रात्मत्वेन स्वलोकयात्रयेति यावत् ।

कुर्वंस्तस्याः पूर्वदिक् [illegible]-
रसर्वां ज्येष्ठ [illegible] हन्तानुजस्य ।
आश्वास्यार्तां मातरं चात्मकार्ये-
ष्वस्तालस्यः पातयामास द्विष्टम् ॥ ११ ॥

स्वस्त्रीयं तं यौवराज्याभिषिक्तं
मैत्र्या पश्यन् निस्तुलं सद्गुणौघैः ।
नाम्ना स्वेनैवाङ्कितं कालभारा-
नस्मै प्रादात् स्वैरमन्तःपुरस्य ॥ १२ ॥

योऽसौ द्वेधा तां नरेन्द्राभिषेकं [illegible]-
न्याविष्कुर्वन् [illegible] गजाश्व ।
आपज्जालात् पाता [illegible] न् कालदूत-
व्यासृष्टानामप्यभीतिं ददाति ॥ १३ ॥

सोऽयं धीमान् वर्षे आसन्नपूर्वं
पञ्चत्रिंशाख्याश्विनोद्वान्तलक्ष्म्या ।

[१] राजश्री विधिवनातुर्य च । [२] स्तुति-
[illegible] काकुष्ठानां [illegible] च । [३] १०२४ तमे
कोलंबाब्दे ।

राज्ञ्या कान्तित्यासकीर्त्या प्रहृष्टः
   प्रीतो भक्त्या मातुलाज्ञां स्व्यकार्षीत् ॥ १४ ॥

आज्ञामेतां सा महाराज्ञ्यपीड्या
   राज्ञा दत्तां भागिनेयाय तस्मै ।
स्वा[2]चाराय स्वान्वयोल्लासकाय
   श्रेयोमूलं नूनमित्यन्वमंस्त ॥ १५ ॥

भूयस्त्वल्पेनैव कालेन कार्या-
   ण्यार्यस्त्रैणान्येव सोऽन्तःपुरस्य ।
स्तुत्यांस्तांस्तान् कल्पयन् नीतिभेदान्
   प्रत्येकं संशोधयामास भूत्यै ॥ १६ ॥

राज्यांगश्रीवल्लरीमूलभूतं
   राजन्यस्त्रीलोककार्याधिकारम् ।
स्थैर्येणैव स्थापयन् भागिनेये
   कार्येष्वन्येष्वप्यधादेष दृष्टिम् ॥ १७ ॥

किं वा स्तुत्या, राजगोपालमन्त्रि-
   द्वारा भूमिं रामवर्मक्षितीशे ।

---

[1] अस्य महाराजस्य मातैवेण । [2] शोभनाचाराय ।

शासत्यस्मिन् सोऽपि कर्षम[1]भर्ता
सिन्धाभर्ता कौतुकादाजगाम ॥ १८ ॥

नैतावत् कोप्यागतो भारतोर्वी-
भर्ता विस्ताराश्रितां केरळक्ष्माम् ।
इत्याह्लादात्यादरस्यास्य भर्तु-
र्भृत्या नित्यं जाग्रति स्म प्रहृष्टाः ॥ १९ ॥

उच्चत्प्रीतिप्रातिनिध्येन हूण-
क्षोणीभर्त्रा स्थापितो भारतेस्मिन् ।
साम्राज्यश्रीसेवितस्स्वैरमागात्
सोऽमुं भूयं सन्दिदृक्षुः किमन्यत् ॥ २० ॥

तस्यालोके राजचूडामणेर्वै-
तस्यालोके हन्त कर्षभभोर्वा ।
हर्षाधिक्यं जात,मन्योन्यमेतौ
मान्यावास्तामत्र तैस्तैर्गुणौघैः ॥ २१ ॥

ताभिस्ताभिस्सत्क्रियाभिस्स हूण-
क्षोणीभर्त्रा प्रातिनिध्यं दधानः ।

[१] Lord Curzon. [२] Viceroy. [३] महाराजस्य ।

कर्णो हर्षाश्चर्यपर्यस्तमौन-
श्चक्रे शक्तेनामुनोर्वीश्वरेण ॥ २२ ॥

बुध्या शक्त्या विद्ययौदार्यतो वा
नैतादृक्षः क्षोणिपः क्षोणिपृष्ठे ।
दृष्टो नेति स्पष्टमाचष्ट हृष्टः
पुष्टाश्चर्यो भारतस्याधिभर्ता ॥ २३ ॥

राज्ञां सेव्येनाखिलज्ञेन कर्ण-
णाभ्यागत्यैवात्र दत्ता सभायाम् ।
श्लाघा सेयं भूपरिष्कारलक्ष्म्या-
नीता भालेनामुनात्ता सलज्जम् ॥ २४ ॥

एवं तावद्भारताधीश्वरोपि
क्षोणीजानिस्सौहृदं साधु बध्वा ।
लोकक्षेमायैव तांस्तानुपायान्
काले काले स्वैरमाधाय रेमे ॥ २५ ॥

चेतश्शल्यं सज्जनानां समन्तात्
कर्षन्नेष क्षोणिपालावतंसः ।

---

[१] उर्वीश्वरगुणगणान् वीक्ष्य विस्मितचित्तो विह्वलकण्ठं उक्तवानित्यर्थः । [२] सतां हि स्वगुणश्लाघाश्रवणे लज्जैवोत्पद्यते ।

मातुः पीडां कुर्वता पादशोफे-
नान्तश्शल्याधूतदार्त्तिर्व्यधायि ॥ २६ ॥

सोयं शोफो दीर्घकालानुषंगी
हा हन्तातीवाखिलान् साधुलोकान् ।
दूनांस्तेने सा तु वीरप्रसूर्वी-
क्ष्यैनं मेने दुस्त्यजं पादभाजम् ॥ २७ ॥

वैद्योत्तंसा विश्रुतोत्कृष्टवीर्यै-
स्सिद्धैस्तैस्तैरौषधैस्ताश्चिकित्साम् ।
कृत्वा नित्यं व्यर्थसर्वप्रयत्ना
भूत्वा स्वान्तस्स्वस्थतामप्यमुञ्चन् ॥ २८ ॥

शुश्रूषार्थं सर्वशक्तः क्षितीशः
पुत्रो यस्या वैद्यमुख्यास्तु भृत्याः ।
सेयं राज्ञ्यप्यामयक्लेशिताऽभूत्
केयं वार्ता दुर्जयो दैवयोगः ॥ २९ ॥

विद्वत्साकं वादगोष्ठीप्रवृत्तौ
[illegible]र्थैः का[illegible]तने च ।

---

[१] सकलचिकित्सानामपि वैफल्यं वीक्ष्य वैद्यवरिष्ठास्तुतरां व्यषीदन्नित्याशयः ।

यन्नैपुण्यं निस्तुलं तज्जनन्या-
शुश्रूषायां चाक्षतं वीक्ष्यते स्म ॥ ३० ॥

मातुश्शुश्रूषारसैकाग्रचित्तो
नित्यं जागर्त्यात्मनस्सोनुजन्मा ।
सौम्यः कृष्णुण्याख्यया सुप्रसिद्ध-
स्साकं भृत्यैरित्ययं न ह्युदास्त ॥ ३१ ॥

"माता लोके सत्सुखानां प्रसूति-
र्माता लोके देशिकस्सद्गुणानाम् ।
माता लोके दृश्य एवेश्वरोस्ती"-
त्येतास्सूक्तीस्संस्मरंस्तां स भेजे ॥ ३२ ॥

शोफस्तस्याः कालपाकाद्व्रणस्सन्
पूयास्रावी गात्रमालिन्यमाधात् ।
यावत्तावत् स्वान्तवैमल्यमुच्चै-
श्श्रीवत्साङ्कस्सेवितोऽधत्त राज्ञयाम् ॥ ३३ ॥

ध्यायन्त्यन्तस्सन्ततं पूर्णवेदा-
धीशस्यांघ्रिद्वन्द्वमानन्दकन्दम् ।

---

[१] यथा यथायं रोगस्समुदजृंभत तथा तथैवास्याः प्र-
तिदिनं विष्णुभक्तिश्चावर्धतेति हृदयम् ।

नामान्येतस्यैव भक्त्याजपन्ती
कालं निन्ये दीर्घमात्तस्थ शय्याम् ॥ ३४ ॥

दानैर्नानारूपसङ्कल्पयोगै-
र्भूमीदेवांस्तोषयन्ती विशेषात् ।
ध्यानैर्नानारूपसङ्कल्पयोगै-
स्सोयं देवांश्चातनोत् सुप्रसन्नान् ॥ ३५ ॥

दैवेनैवं पञ्चकं वत्सराणां
शय्यायां सा शायिताभूत् सबाधम् ।
मन्ये मर्त्येशस्य तां मातृभक्तिं
स्पष्टीकर्तुं सर्वतस्तावदुर्व्याम् ॥ ३६ ॥

तेनोर्वीशेनाहतायामुदारे-
णास्यां देव्यामार्तशय्याश्रितायाम् ।
भूदेवेभ्यो निस्स्वता निर्गताऽगात्
भूभृत्कोशानेव कालक्रमेण ॥ ३७ ॥

---

[१] रोगशान्तिरस्त्वित्याद्यनेकसङ्कल्पैस्साकमेव प्रायशो दानानि क्रियन्ते । [२] धन्वन्तर्यादिमूर्तिचिन्तासंबन्धो देवध्यानेष्वपि संभवत्येव ।

यद्यल्लोके पुण्यकर्मामयघ्नं
  विद्वल्लोकैः कीर्तितं तत् समस्तम् ।
पृथ्वीदेवैः कारितं दुश्चिकित्स्यो
  राज्ञीरोगस्त्वत्यलं वर्धते स्म ॥ ३८ ॥

सूनुत्रय्या चैकया स्वीयपुत्र्या[1]
  पौत्र्या चान्यैस्सेव्यमानाऽपि राज्ञी ।
साथ स्वैरं प्राग्द्वितीयात्मजेन
  प्राप्तं लोकं प्रत्यगात् पुण्यकाले ॥ ३९ ॥

सागात् षट्सप्तत्यनूनाधिकेऽब्दे[2]
  पुण्योल्लासिन्युत्तराख्यायनादौ ।
स्वर्गं राज्ञी सूनुहस्तप्रदत्तै-
  र्वित्तैर्वैद्यब्राह्मणान् प्रीणयन्ती ॥ ४० ॥

निर्याणेऽस्या निस्तुलः कोपि ताप-
  स्साधूनां यस्तूदभूत् पादभाजाम् ।
सोयं भूयः काञ्चनद्रव्यवर्षैः
  क्षोणीन्द्रेण क्षीणतामाशु निन्ये ॥ ४१ ॥

---

[१] एकैवास्या अन्त्यपुत्री कुञ्जिक्काख्या तदावर्तत ।
[२] १०७६-तमे कोळम्बाब्दे ।

संस्काराद्यं पैतृकं कर्म सर्वं
कृत्वा मातुस्सानुजस्स्वादृतात्मा ।
जात्वा पश्चाद्दीक्षया वर्षमेकं
सार्थं मेने जन्म चार्थेश्वरोयम् ॥ ४२ ॥

स्थानारूढा सा महाराज्ञ्यपि द्रा-
गेनोहीनामग्रजामन्वगच्छत् ।
दीनो भूमीशोप्यलं मातृभक्त्यै-
वैनां शोचन्मान्यमानृण्यमार्च्छत् ॥ ४३ ॥

तत्सूनुभ्यां राजकीयं पदं त-
त्तार्त्तीयीकं तुर्यमप्याश्रिताभ्याम् ।
तस्याश्शेषाण्यार्यकार्याण्यशेषा-
ण्युर्वीपालः कारयित्वाधिनोत्तौ ॥ ४४ ॥

यावश्रान्तं रामसौमित्रिमैत्रीं
कालेप्यस्मिन् कौतुकाद्दर्शयन्तौ ।
साधुश्लाघ्यौ सत्क्रियास्वेव लोलौ
भूरक्षोपायादृतौ नित्यमास्ताम् ॥ ४५ ॥

---

[१] भुवो रक्षाया उपायेष्वादृतौ । भुवि रक्षसां अपाये-ष्वादृतौ च ।

अन्यादृक्षैस्सद्गुणैरस्य भर्तु-
स्सन्तुष्टाराद् सापि विक्तोरियादात् ।
लोकश्लाघाभाजनं राजमान्यं
"केसीयेस्सै"रूपकं प्रीतिचिह्नम् ॥ ४६ ॥

मन्त्री नित्यं सर्वकार्यैकधुर्य-
स्सत्यं जागर्त्यैव सारज्ञवर्यः ।
यद्यप्युद्यत्पौरुषा सर्वतोपि
प्रत्यक्षैव प्रैक्षि राज्ञोऽस्य शक्तिः ॥ ४७ ॥

प्रारब्धं यन्मन्त्रिवर्येण कार्यं
प्रायस्सर्वं सम्मतं स्वामिनस्तत् ।
सौजन्येनाप्यादिमो राज्यरक्षा-
नैपुण्येनाप्यन्वगाद्यदद्वितीयम् ॥ ४८ ॥

यावद्भूपस्याऽशयोऽलाक्षि भिन्न-
स्तावन्मन्त्रीन्द्राशयस्सञ्चुकोच ।
वह्नेस्तेजस्सुस्फुटं प्रज्वलेत् किं
मार्तण्डीये धाम्नि देदीप्यमाने ॥ ४९ ॥

---

(1) The little of K. C. S. I.

तालीपत्रेभ्योऽचिराद्राजकीया
मुद्रा कृष्टा कोकलेषु न्यधायि ।
सौकर्यं यत्तेन खल्वत्र जातं
कार्येष्वेतद्दृश्यतेद्यापि सर्वैः ॥ ५० ॥

पत्रे पत्रे वीरलक्ष्मीविशिष्टं
पृत्वीशस्यास्थास्यबिम्बं हरित्सु ।
दुष्कृत्येषु व्यापृता ये त्वपश्यन्
हृद्युत्त्रासात्तद्रुचिं तत्यजुस्ते ॥ ५१ ॥

मुद्रापत्राण्युत्थितान्येवमाधु-
र्नित्यं तत्तत्कार्यसौकर्ययोगात् ।
सन्तोषोद्रेकं यथा सत्सु तद्वत्
सम्पोषोद्रेकं च कोशेषु राज्ञः ॥ ५१ ॥

सत्रेष्वासन्नालयस्थाद्द्विजानां
नित्यं यासीद्व्याप्तिरेषा न्यषेधि ।
प्रीत्या चोद्यत्सद्रसं दीयते स्म
प्रत्येकं हि श्रद्धयैवाध्वगेभ्यः ॥ ५२ ॥

---

[१] राजमुद्रा हि पूर्वमत्र तालीपत्रेष्वेव निहितासीत्
(2) Paper.

एषा नीतिर्निन्दितापीह वं...
चोषायासीदन्नसौलभ्यजन्या ।
बालानां यत्तन्द्रयाधावि दूरं
विद्योद्योगेनोच्चकैश्चोदजृंभि ॥ ५४ ॥

देशे देशे पाठशाला विशाला
व्यद्योतन्त प्रोद्यताध्यापकाढ्याः ।
यासां तावत्सम्प्रचारादिहासीत्
सर्वज्ञत्वं शाङ्करं किङ्करेपि ॥ ५५ ॥

मासे मासे राजवंश्येषु संपत्
कोशागाराद्दीयमानाऽल्पिताऽसीत् ।
राज्ञो भूतिस्सा प्रजाभ्यो हृता हि
क्षेमायासामेव देयास्त्युपायैः ॥ ५६ ॥

हार्यं वित्तं किञ्चिदल्पीकृतं वा-
स्त्वेतेषां नन्वन्यलोकैरहार्यम् ।
विद्यारूपं वित्तमिष्टानुरोधात्
प्रत्येकं तद्दापितं वर्धितं च ॥ ५७ ॥

विश्रान्त्याज्ञा भूमिखण्डाधिकार-
स्थानस्थानां प्राक्तनानां व्यतारि ।

येषां काश्चिद्राजकार्यप्रणाली-
क्लेशायासन् रीतयो नीतिशून्याः ॥ ५८ ॥

शून्यस्थानेष्वाश्रियापरीक्षा-
सूत्तीर्णा एवादरात् संनियुक्ताः ।
आज्ञातैतद्वेतनेषून्नतिश्चा-
प्युत्कोचादौ नाभिलाषो यथा स्यात् ॥ ५९ ॥

योधानां च प्राक्तनी वैपरीति-
र्दूरान्मुक्ता नूतना चाहिताऽभूत् ।
पूर्वं सर्वं पूज्यमेवेति धीर्न
क्षोणीशं वा मन्त्रिणं बाधते स्म ॥ ६० ॥

धर्म्यैष्वर्थ्येष्विष्टदेषु प्रजानां
नव्येष्वेवंभूतनानोद्यमेषु ।
नीतिज्ञानाम्भोधिकुम्भोद्भवस्य
क्षोणीभर्तुः पाटवं स्पष्टमासीत् ॥ ६१ ॥

अध्यारुह्य प्राड्विवाकाधिकार-
स्थानान्याकर्ण्य क्वचित्तद्विवादान् ।

---

(1) Courts of Justice.

सत्य.न्मार्गान्न स्खलेयुर्यथा ते
यत्नोप्युर्वीशेन चक्रे तथोच्चैः ॥ ६२ ॥

विद्या[1]गाराण्युद्यतः प्राप्य है[2]णीं
वाणीं गै[3]र्वाणीं क्वचित् कै[4]रळीं च ।
व्यालोड्याचार्यांश्च विद्यार्थिवर्ग-
द्वाराऽमूलाग्रं परीक्ष्याधिनोत्तान् ॥ ६३ ॥

गैर्वाणीं तां पोषयिष्यन् विशेषा-
दध्येतॄणामत्र सन्तोषणार्थम् ।
वर्षे वर्षे वित्तसंख्यामनल्पा-
मुच्चित्यादात् खल्वतुल्यप्रभावः ॥ ६४ ॥

आर्तैः कीर्णान् देहैरत्नालयांश्च
प्रत्येकं स प्रेक्ष्य वैद्याहृतस्सन् ।
काले काले चान्तरुद्यत्कृपार्द्रो
वित्तैर्वस्त्रैर्वाग्भिरप्रीणयत्तान् ॥ ६५ ॥

का[6]रागारं चान्तराविश्य धीरः
क्रूराकारान् भूरिशो लंघिताज्ञान् ।

---

(1) Schools. (2) English. (3) Sanskrit, (4) Malayalam. (5) Hospitals. (6) Central Jail.

घोरान् वीरांश्चासकृद्दण्ड्यमाना-
नारात् कारुण्यार्थिनोप्यैक्षतायम् ॥ ६६ ॥

दृष्टे चैवं सद्मनोर्युग्मकोस्मिन्
रक्षां शिक्षां चातिरेच्थ क्रमेण ।
तुष्टान् क्लिष्टांश्चातनोत्तज्जनौघान्
शिष्टासेव्यस्सोवनीजीवनाथः ॥ ६७ ॥

आर्ता वैद्यं याचकाः कल्पवृक्षं
क्षोणिः कान्तं क्रूरकृत्याः कृतान्तम् ।
रामं कामिन्यस्त्वमन्यन्त शश्व-
द्विद्वद्वर्या मित्रमप्यर्थपं तम् ॥ ६८ ॥

पूर्वे भूपा मन्त्रिणो वा यथेष्टं
सर्वेषां नैवाभिलक्ष्या बभूवुः ।
एतौ नित्यं क्षोणिपामात्यवर्यौ
कार्येष्वास्तां सर्वतस्सर्वदृश्यौ ॥ ६९ ॥

यावन्नैव व्यत्ययगुण्षट् समा न-
न्वेवं तास्मिन् बिभ्रति क्षोणिमीशे ।

---

[१] नान्वगृह्णादित्यर्थः । (2) Hospital and Jail.

तावत् कोपि श्रीविलासो जनौघ-
श्रेयोमूलं भूतलेऽत्राविरासीत् ॥ ७० ॥

यद्यत् सौख्यं सत्तमाभ्यां महीभृ-
न्मन्त्रीन्द्राभ्यां लभ्यमत्राखिलं तत् ।
गोश्रीराज्येऽलभ्यत प्राणिवर्गैः
काले ह्यस्मिन् भाग्यसौभाग्ययोग्यम् ॥ ७१ ॥

एवं माटक्षितिपतिरशे-
षाहतौजाश्शशास
क्षोणिं सम्यक्सचिवमणिना
स्वानुरूपेण साकम् ।
देवेन्द्रश्रीर्दिनमनु जन-
प्रीणने जागरूकः
स्वैरं नीत्या सकलसुखदान्
संविचिन्वन्नुपायान् ॥ ७२ ॥

इति रामवर्मविजये नव्यकाव्ये
परिष्कारोदयो नाम चतुर्थस्सर्गः

॥ समाप्तः ॥

॥ पञ्चमः सर्गः ॥

अथ वीतभयं शासत्यवनीमवनीश्वरे ।
कतिचित् कलिकालुष्याद्विदधुः प्रतिपक्षताम् ॥ १ ॥

मदो हृदि महानेषामिति किं विधिनाऽत्र ये ।
महामदपदाभिख्या विहिता निहिताः क्षितौ ॥ २ ॥

येषां तु कुलजः कोपि मामुदाख्यो महाबलः ।
इन्ध्यां द्वादशकृत्वः प्राक् प्रक्षोभ्यार्थानपाहरत् ॥ ३ ॥

तेषु क्षोभेषु बालस्त्रीवृद्धजातिमतादयः ।
नागण्यन्त वधे हन्त तेन वित्तैकलिप्सुना ॥ ४ ॥

दशास्यविक्रमस्सोपि टिप्पुर्येषां हि वांशिकः ।
यत्खड्गभुजगो नागः प्राणवायून् बहून् पपौ ॥ ५ ॥

ते ते विक्रमसम्पन्ना अक्रमेणैव भूभरम् ।

---

[१] तानेव नवभिः पद्यैर्विशिनाष्टि । [२] Mamud of Ghazhini. [३] अयं बालः इयं स्त्री इत्यादिगणनां विना सर्वानप्यवधीदित्यर्थः । [४] Tippu Sultan.

ऊढवन्तश्चिरं दिल्लीमध्यूषुर्यत्कुलेश्वराः ॥ ६ ॥

तेषां भरणकालेषु केषां नासीत् कदा नु वा ।
बलाधिकभुजादण्डात् कालदण्डादिवैव भीः ॥ ७ ॥

वीर्यैस्ताननुयान्तोमी कालेऽस्मिन् नृपशासनात् ।
कथञ्चिन्नामिताध्वाँगा लक्ष्यन्ते खल्वितस्ततः ॥ ८ ॥

अप्याकबरमुख्यैश्च महद्भिस्तत् कुलं पुरा ।
भूषितं त्वनुगन्तारस्तेषामेषु सुदुर्लभाः ॥ ९ ॥

अद्यापि खलु ते वीराः क्वचिद्दितिजविक्रमान् ।
दर्शयन्तः क्षमाधीशान् क्लेशयन्त्यन्तरान्तरा ॥ १० ॥

एषां तु गोश्रीनगरे निलयास्सन्ति भूरिशः ।
निरया इव निर्वेदं सुधियां जनयन्ति ये ॥ ११ ॥

तद्वास्तव्यैः क्षितीशस्य कृपयैव कृताश्रयैः ।
अप्यलंघि बतास्याज्ञा न ध्रुवं विनयोऽसताम् ॥ १२ ॥

अजानन्तश्च ते हन्त भूजानेरस्य पौरुषम् ।
आयुधग्रहणादेव क्षणादवसरं ददुः ॥ १३ ॥

---

(1) Delhi. (2) Akber the great. (3) The town of Cochin.

वेरायैषां चैत्यगृहस्याग्रगेणाध्वनाऽदरात् ।
हैन्दवैर्निजदेवस्य घोषयात्रा व्यधीयत ॥ १४ ॥

सा यात्रा मतपारुष्यविहितानेकसाहसैः ।
न चिषेहे मदान्धैस्तैः क्व विवेको दुरात्मनाम् ॥ १५ ॥

तदा तदा च प्रत्यब्दं विप्रियं विविधं च ते ।
देवोत्सवकृतोत्साहेष्वकुर्वन् हन्त हिन्दुषु ॥ १६ ॥

अमी च साधवस्तेषां विक्रमेण भृशार्दिताः ।
अपि यात्राविधौ तास्मिन् पूर्वरीतिं न तत्यजुः ॥ १७ ॥

क्व तावदीश्वरः क्वैषा यात्रा क्व च जनोद्यमः ।
मनुजैर्मतवैचित्र्यात् किं किं न हि विधीयते ॥ १८ ॥

भास्वामेताद्विमर्शोऽत्र काले तस्मिन् कदाचन ।
देवयात्रोत्सवस्तस्यामासन्नः पुर्यवर्तत ॥ १९ ॥

ते च तत्तादृशक्रूरकर्माणो हि महामदाः ।
संघीभूय विनिश्चिक्युर्देवयात्रानिरोधनम् ॥ २० ॥

---

(1) Mosque. (2) Thiyyas. (3) Procession.
[४] एतन्मतानुयायिनां प्रायेणेतरमतद्वेषो दृश्यते । तदेवात्र पारुष्यम् ।

महामदमदाक्रान्तैर्हिन्दुभिः प्रार्थितो नृपः ।
यथापुरं घोषयात्राविधानेऽनुमतिं ददौ ॥ २१ ॥

कोपि क्षोभो न कर्तव्यस्तत्रेत्यूर्जितशासनः ।
आज्ञां स्वयमिहत्येषु प्रत्यर्थिषु च सोऽदिशत् ॥ २२ ॥

स्वामिनोत्रानुकूल्यं चेत् किमेतैरपरैश्च वा ।
इति देवोत्सवे तस्मिन् घोषाधिक्यं व्यधुश्च ते ॥ २३ ॥

राज्ञोप्याज्ञां तृणायैव मत्वा तेप्यतिदुर्मदाः ।
विग्रहायोद्यतास्तस्थुर्दुर्ग्रहा ह्यसतां गतिः ॥ २४ ॥

देवयात्रोत्सवस्सोपि दीपावलिसहस्रकैः ।
रात्रौ दिनभ्रमं कुर्वन् प्रचचाल यथापुरम् ॥ २५ ॥

मदालसमहानागैर्विविधायुधपाणिभिः ।
विस्तृता घोषयात्रैषा युद्धयात्रायिता बभौ ॥ २६ ॥

अनेकविधवादित्रनिस्वनैर्नालिकस्वनैः ।
आपूर्य ककुभस्सैषा देवयात्रोदजृम्भत ॥ २७ ॥

घोष एष तदोद्गच्छन् हैन्दवद्वेषपावके ।

[१] यथापूर्वम् । [२] महाराजस्य राजप्रेक्षकस्य च ।

महामदमनोदीप्तेः समीरणधुरां दधौ ॥ २८ ॥

स्वत एवेतरमतद्वेषदूषितमानसैः ।
तैश्च चैत्यसमीपाध्वन्याश्रितः प्रैक्ष्ययं महः ॥ २९ ॥

ततश्च प्रळयांभोधितरंगोत्तुंगविभ्रमैः ।
दण्डोद्यतभुजादण्डैश्शत्रुभिर्मर्दितो महः ॥ ३० ॥

तान् वीक्ष्योत्सवसन्नद्धैर्हैन्दवैरविचिन्तितम् ।
अत्याहितमिति त्रस्तैरण्ययुध्यत सत्वरम् ॥ ३१ ॥

राजपूरुषसाहाय्यात् बहुसाधनवैभवात् ।
मुहूर्तमेते विमतांस्तांश्च प्रत्यव्रतास्थिरं ॥ ३२ ॥

तलातलि पुनर्युद्धं दण्डादण्डि च भीषणम् ।
प्रवृत्तमाविनिर्धार्यजयापजयलक्षणम् ॥ ३३ ॥

दीपास्तद्यष्टयश्छत्राण्यसिचर्माणि चाभवन् ।
आयुधान्येकतोन्यत्र दण्डहस्तनखादयः ॥ ३४ ॥

केचित् पेतुर्मृतप्रायाः केचित्सपदि दुद्रुवुः ।

---

[१] महाभीतिः । [२] तलपदमत्र करतलार्थकम् । तलैश्च तलैश्चाहत्य प्रवृत्तं युद्धं तलातलि । एवं दण्डादण्ड्यपि ।

केचित्त्वासन् यशःप्राणक्रयविक्रयणोद्यताः ॥ ३५ ॥

अग्रतश्च भुजादण्डखण्डितामितहैन्दवाः ।
ध्वंसमभ्युपरीतास्यास्तनुत्रसशिरस्त्रकाः ॥ ३६ ॥

पदाहतिकृताटोपाः परश्शताभितस्ततः ।
महामदभटा एव लक्ष्यन्ते स्म जयोद्धताः ॥ ३७ ॥

यावन्न पराभवस्सास्तु तावच्चन्द्रभ्रमा निवेदितः ।
भूपो न्ययुंक्त स जवात् सचिवेन्द्रं ससैनिकम् ॥ ३८ ॥

राजगोपालमन्त्रीन्द्रप्रास्तोपाकृता च सा ।
अत्र सेना घनश्रेणिरस्त्रवर्षाण्यवाकिरत् ॥ ३९ ॥

प्रोज्ज्वलन्नाळिकोद्भ्रान्तसीसास्त्रनिकरैः क्षणात् ।
महामदा महे तस्मिन्नमदास्सैनिकैः कृताः ॥ ४० ॥

तथाप्यन्वर्थतां नाम्नि दधानास्ते सहस्रशः ।
प्राद्रवत् परिखः केचिच्छ्याम्यां परमगुः पुरीम् ॥ ४१ ॥

इति निश्शेषतां तत्र नीत्वा माहामदीं चमूम् ।
सचिवप्रवरो गच्छन्नुत्सुकैः श्लाघितोऽखिलैः ॥ ४२ ॥

---

[१] युद्धमध्य एव मर्तुमुद्यता इत्यर्थः । [२] महे अमदा इत्यधुना तेषामन्वर्थनामकत्वम् ।

नृप एष निशीथेपि जागर्त्यार्तजनावने ।
इति साधुजनैस्तत्र संस्तुतोभूद्विशेषतः ॥ ४३ ॥

अथ भूपतिरात्मीयप्रजासु कुशलोदयम् ।
अपूर्वं किञ्चिदाधित्सुर्जगाद सचिवोत्तमम् ॥ ४४ ॥

जेजीयते खलु चिराङ्गारते परितश्चरन् ।
दलहौसिप्रतापाग्नेर्धूमवद्धौमिको रथः ॥ ४५ ॥

तत्प्रचारणमत्रापि मत्पूर्वैः काङ्क्षितं क्षितौ ।
यद्वशाद्विविधोल्लासास्सन्दृश्येरन् विभूतयः ॥ ४६ ॥

नीयते च कियतेरस्या मृत्युना प्रतिवासरम् ।
दूरतो वनयात्रासु व्याघ्रतस्करार्दितो जनः ॥ ४७ ॥

समयस्य व्ययो [illegible]भूयते ।
वस्तूनामप्यसूनां च किं वा शोच्यमतः परम् ॥ ४८ ॥

किञ्च तण्डुलमुख्यानां वस्तूनां च कदध्वना ।
नेयत्वाद्बहुधा नाशः श्रूयते हि क्व वा तदा ॥ ४९ ॥

---

[१] Train. इन्द्यायामस्य प्रथमप्रचारको दळहौसिरेव Lord Delahousi. [२] विपिनं जलं च । [३] कुत्सितेन तस्करादिबहुलेन अध्वना ।

इत्यसौकर्यमनिशं तत्तत्कार्येषु दुस्सहम् ।
चिराय विदितं हर्तुं मया सपदि वाञ्छयते ॥ ५० ॥

अपायरहितोन्यः कोप्युपायो नात्र विद्यते ।
ऋतेऽखिलाहितोदर्काद्धूमयानप्रचारणात् ॥ ५१ ॥

तदत्र धूमयानस्य प्रयत्नः संप्रचारणे ।
कार्यतामित्युपाकर्ण्य प्रत्युवाच स भूपतिम् ॥ ५२ ॥

स्वामिन् श्रीमद्वितीर्णेयं न्याय्यैवाज्ञा न संशयः ।
राज्यकोशविमर्शस्तु प्रतिबन्धोत्र दुस्तरः ॥ ५३ ॥

विस्तारेणेयमल्पापि सूतेऽनल्पां श्रियं क्षितिः ।
प्रतिवर्षं विशेषेण भावरकात् पर्यवेक्षणात् ॥ ५४ ॥

तथाप्यवश्यकर्तव्या व्ययाश्च बहवः खलु ।
एवं सुबहुवर्षीयेनाप्यसाध्योयमुद्यमः ॥ ५५ ॥

आयाधिकं व्ययं कुर्वन् राजा वापि धनेश्वरः ।
नश्येदिति सतां सूक्तिर्लङ्घयते विबुधैः कथम् ॥ ५६ ॥

तस्मादस्मिन् महोद्योगे भृत्यानस्मानपि प्रभो ! ।

---

[१] व्ययावशिष्टो धनांशः क्षय इत्युच्यते ।

अपायभीरुपारुन्धे भवत्कुशलकांक्षिणः ॥ ५७ ॥

स्वामिभक्तिपरेणैवं नीतिविज्ञेन मन्त्रिणा ।
बोधितस्स बुधाराध्यो भूपतिः पुनरब्रवीत् ॥ ५८ ॥

सचिवाग्रिम धर्मोयं यत्तु नित्यं निजप्रभोः ।
पुरः किमपि निर्व्याजं स्वाशयस्य प्रकाशनम् ॥ ५९ ॥

न्याय्यैव दृढमेषोक्तिर्गीष्पतेरिव तादृशी ।
केन नांगीक्रियेतोच्चैर्नीतिमार्गविचारिणा ॥ ६० ॥

किन्तु क्लेशोत्र कष्टाध्वप्रचारजनितः प्रजाः ।
नित्यं सत्पथसञ्चाराविस्तृताशीः प्रबाधते ॥ ६१ ॥

तन्निवृत्तिकरं किं वास्त्यन्यवस्त्वखिलादृतम् ।
धूमधूम्रमुखात् सर्वानन्दनात् स्यन्दनादृते ॥ ६२ ॥

अतस्तदानयनतः कृतार्थास्सन्तु मत्प्रजाः ।
व्ययोत्र सञ्चितार्थानामृणं वापि तृणायताम् ॥ ६२ ॥

बहूनां बहुधैव स्युरस्मिन्नर्थेऽधुनाशयाः ।

---

[१] निर्भयमार्गेण सञ्चारमभिलषन्तीः । सदाचारमार्गेणैव सदा सञ्चरन्तीश्च ।

नच शङ्कात्र कार्यैष शुभोदर्को भविष्यति ॥ ६४ ॥

इति स्थिरोधमस्यास्य शासनं स महाशयः ।
गुणोद्भवगमत्वेक्ष्येव श्लाघयन् शिरसाऽग्रहीत् ॥ ६५ ॥

ततश्च सञ्चितार्थान्स राजस्थानेष्वितस्ततः ।
एकीकृत्य समुच्चित्य कोशराशिमपोषयत् ॥ ६६ ॥

ऋणादानरते तस्मिन् क्षणादेव धनेश्वराः ।
अधमर्णगुणान् वीक्ष्य सम्पदस्सञ्चिता ददुः ॥ ६७ ॥

एवं स धनलक्षाणां पुञ्जान् सञ्चित्य सत्वरम् ।
धूमस्यन्दननेतृणां संघं स्वैरमुपागमत् ॥ ६८ ॥

पार्थिवाज्ञानुरोधेन तैस्तैश्च सह निश्चयैः ।
धूमयानप्रचारस्य धुरं तत्रैव स न्यधात् ॥ ६९ ॥

इति तस्मिन् बहूनत्र परिष्कारान् वितन्वति ।
सङ्कटैर्विविधैस्साकं व्यत्यगाद्वर्षपञ्चकम् ॥ ७० ॥

तदा तु भूपस्संस्मृत्य निश्चयं पूर्वमाहितम् ।

---

[१] पञ्चभिरब्दैरत्र विविधसङ्कटानां च प्रणाशोभूदित्यर्थः । [२] वत्सरपञ्चकावसाने प्रतिप्रेषणीयोयमित्येव पूर्वनिश्चयः ।

मन्त्रिणः प्रेषणायैच्छत् प्राक्तनं तत् पदं प्रति ॥ ७१ ॥

सोऽप्यवेक्ष्यावधिं गोश्रीसाचिव्यस्यास्य निश्चितम् ।
प्रश्रितः पदयोर्भर्तुरनुज्ञामभ्ययाचत ॥ ७२ ॥

उभौ तावदलक्ष्येतामतिम्लानमुखश्रियौ ।
अन्योन्यविरहावेशविमर्शाद्विधुराशयौ ॥ ७३ ॥

अथ वीरस्स्वमुद्राङ्कामनुमोदनपत्रिकाम् ।
सहैवानुज्ञयाऽयच्छत् सचिवेन्द्राय भूपतिः ॥ ७४ ॥

सोऽप्युपर्युपरि स्वस्य भव्यानामथ भाविनाम् ।
निदानभूतां तां गृह्णन् नमस्कृत्य विनिर्ययौ ॥ ७५ ॥

युवराजं महाराज्ञीं मान्यानन्यांश्च सादरम् ।
विज्ञाप्यानुमतिं तेषां स्वीकृत्यैष पुरीं जहौ ॥ ७६ ॥

अधिकारिवरास्सर्वेऽप्यधिकाद्दृतचेतसः ।
प्रजाभिस्सह मन्त्रीन्द्रमन्वगुस्तच्छुभार्थिनः ॥ ७७ ॥

---

[१] Certificate. [२] तदनन्तरमयं वञ्चिराजसाचिव्यादीन्यधिकारपदान्यधिरुह्य क्रमेणात्युन्नतं चक्रवर्तिसाचिव्यमप्यवापत्, तत्र निदानमियं पत्रिकैवेत्यत्र कविहृदयम् ।

सर्वानामन्त्र्य सोऽयं सचिवमभिरथ
स्थीनतिक्रम्यातिभूमिं
गांधारभूमिं विलंघ्य स्थलजलसरणि-
ष्वात्ततद्योग्ययानः ।
धूमाङ्कस्यन्दनेन त्वरितमुपगतो
मद्रभर्तुस्समीपं
तेन क्षोणीन्द्रपत्रेक्षणमुदितहृदा
सादरं नन्दितोऽभूत् ॥ ७८ ॥

इति श्रीरामधर्मविजये नव्यकाव्ये
धूमयानोद्यमो नाम पञ्चमस्सर्गः

॥ समाप्तः ॥

---

[१] तदा तत्र धूमरथाभावात् स्थलसरणिष्वश्वोक्षमहा-शकटैर्जलसरणिषु प्रशस्तनौकाभिश्च प्रयाणं सौकर्यानुरोधात् कृतमित्यवधेयम् ।

॥ षष्ठः सर्गः ॥

लोकाधिपस्तदनु लोक इति प्रसिद्धं
  दृष्ट्वाग्र्यमात्मसचिवेन्द्रपदे न्ययुङ्क्त ।
सः प्राड्विवाकपदमत्र चिरं विभूष्य
  तिष्ठन्ननन्यसुलभामतनोत् समज्ञाम् ॥ १ ॥

स क्ष्माभिभक्तिमृजुतां सदयाशयत्वं
  सत्यं च नात्यजदपापमतिः कुतोऽपि ।
इत्यस्य मर्त्यपमणेरतिसम्मतोऽभूत्
  सत्सु स्वयं खलु सतां मतयो रमन्ते ॥ २ ॥

प्राक् प्राड्विवाकपदमप्यथ मन्त्रिवर्य-
  स्थानं च सोऽत्र सरसं सकलप्रजाभिः ।
संभाव्यमानमवहत् सुखमित्यतीव
  क्वापि प्रशस्तिरुदजृम्भत दिशु दिशु ॥ ३ ॥

---

(1) Dewan Lock. (2) Judge.

अध्यात्मपूर्वसचिवेन विशेषतोऽस्मि-
न्नारब्धमग्निशकटानयनप्रयत्नम् ।
तैस्तैर्यथोचितगुणं कलयन्नुपायै-
र्नीत्यैव निस्स्वजनतामधिनोन्नितान्तम् ॥ ४ ॥

संप्रार्थितोऽथ धनलक्षचयानयच्छत्
भूमीश्च धूमशकटानयनायनार्हाः ।
भूस्वामिनामपि दिदेश तदैव मूल्यं
स्वस्वावनीविभवविस्तृतिवद्यथायोग्यम् ॥ ५ ॥

माटेश्वरस्य नवधूमरथायनार्थं
वञ्चीश्वरोऽपि स महीं कुतुकाद्व्यतारीत् ।
लोकोपकारकरणाय कृतोद्यमेषु
को वा सुधीर्नतनुयात् स्वयमानुकूल्यम् ॥ ६ ॥

राजाज्ञया तदनु संघजनाश्च गोष्ठी
भूमिं पुरेव तटिनीशतटीं कपीन्द्राः ।
आगत्य यावदयतन्त ततः स्थलेषु
निम्नोन्नतेष्वलमलक्ष्यत वैपरीत्यम् ॥ ७ ॥

---

[१] संघजनसमूहः । [२] The State Engineers of Travancore. [३] The members of the Railway Company.

नानापगासु कृतविक्रमसंक्रमार्थे-
स्वस्थानशैलनिकरोदरकन्दरैश्च ।
विस्तारिता नचिरतोऽनलयानपद्या
गोश्रीजुषा किमपि कौतुकमाततान ॥ ८ ॥

लोकेश्वरेण सुतरामुपलब्धमाना
सा धूमयानपदवीफणिराजमूर्तिः ।
श्रीमन्महापणमिषेण निजाग्रदेशे
रत्नोज्ज्वलां व्यतनुतात्र महाफणालीम् ॥ ९ ॥

कालेन तावदविलंबमथाविरासी-
न्माटुङ्गमाकलितपुण्यफलायिताश्च ।
धूमावलिप्रसरतश्च जवातियोगा-
दाकाशयानमलिनत्वकृदाग्नियानम् ॥ १० ॥

मानं विशिष्टमयमश्नुत इत्यतोभूत्
सार्थाभिधश्चिरममेयगुणो विमानः ।

---

[१] [illegible] ridges. [२] राज्ञा विष्णुना च । [३] [illegible] । [४] विशिष्टो मानो यस्य [illegible] पञ्चत्वान्विशेषकत्वम् ।

भूयस्तु धूमशकटेन जितोपि नौञ्ज-
दन्वर्थतां बत यतो विगतोस्य मानः ॥ ११ ॥

नित्यं ततश्चरति निस्सृतधूमधाम्नि
निस्तन्द्रनेतृवरनिश्चितकालकृत्ये ।
ज्योतिर्वहेत्र शकटेंबुदवज्जलाढ्ये
गोश्रीर्भुवाप्यत सदाखिलसम्पदृद्धिः ॥ १२ ॥

वह्निं क्वचित् क्वचन वारि परत्र दारु-
पंक्तिं क्वचिच्च मनुजान् कुहचिद्द्विपेन्द्रान् ।
सिंहान् खगानपि मृगांश्च बिभृत्य धावन्
नीलोद्रिराज इव धूमरथोचरत् क्ष्माम् ॥ १३ ॥

नानामतान् विविधवेषधरांश्च मर्त्या-
नाबालवृद्धमखिलार्थयुतानभेदम् ।
भूलोक एव नु वहन्नधुनैवमाया-
त्येतां मतिं च सुधियामदधाद्रथोयम् ॥ १४ ॥

एतावदंबुगहनाहितदीर्घयात्रा-
गम्या दिशास्त्रिचतुरस्सुगमा मुहूर्तैः ।
आसन्निहेति सकलैरनुभूतपूर्वान्
क्लेशान् विचिन्त्य पुनरां सुखमन्वभावि ॥ १५ ॥

नित्यं जनैस्तत इतो मलयानवद्य-
स्याधानयानसचयः प्रतिपाल्यते स्म ।
राज्ञो यथैव परतापहृतिप्रवीणा-
वेतौ बहूनि हि शुभानि जगत्यकार्ष्टाम् ॥ १६ ॥

दिक्षु द्रुतं नयति वैद्युतनव्यतन्त्री
वृत्तान्तमेष तु रथो वपुरप्ययाति ।
विश्वस्य दूरविहरत्सुहृदोऽपि लोका
विध्वस्तदुस्सहवियोगरुजं न्यवात्सुः ॥ १७ ॥

यानं तदागतमशेषमहाजनाना-
मानन्ददायि बहुधा बहुदैन्यहारि ।
साधारणेतरफलर्द्धि नृपस्तु पश्य-
न्नेतन्निमित्तकमघं सुखमेव मेने ॥ १८ ॥

यत्नः पुराग्निशकटस्य कृते बलीया-
नाचार्यमन्त्रितिलकेन कृतः परस्तात् ।
प्राचारयत् सकललोकहितार्थमेत-
ल्लोकस्स्वयं सचिवपुंगव एव धन्यः ॥ १९ ॥

---

[१] अन्यदुःखनिवर्तने । दूरवर्तित्वनिराकरणे च । [२] Telegram. [३] दुःखम् । ऋणादानादिजनितम् । "परोपकारप्रभवं हि दुःखं पुंसस्सुखायैव महत्तमस्य" इति भावः ।

काले चलत्यथ नृपस्तु विशेषदक्षः
कार्येषु वीक्ष्य तमशेषजनादृतस्सन् ।
आदिश्य तत्स्थिरपदे मुदितं व्यतानी-
दाधिः क्व तादृशविनेतृमतानुगेषु ॥ २० ॥

आलोच्य भूपतिरथो निजकार्यभारा-
न्नारादशेषमहनीयविशेषबोधः ।
क्षोणीपरीक्षणविधावधिकप्रवीण-
मेकं विमृश्य सचिवाग्रिमतां व्यतारीत् ॥ २१ ॥

पट्टाभिराम इति वैष्णवभूसुरेन्द्रः
पुष्टादरं स वसुधाधिपतेर्नियोगम् ।
हृष्टाशयस्समधिगत्य समीपमेत्य
शिष्टादृतस्सदसि तं प्रणतोभ्यगृह्णात् ॥ २२ ॥

यः प्रेषितोत्र भुवि पार्थिवतुष्टिहेतो-
र्भर्त्रैव मद्रनगरस्य महाधिकारात् ।
आकृष्य कृष्णसमयान्तमिति प्रकामं
लोकास्स्वयं बहुमतिं समतन्वतास्मिन् ॥ २३ ॥

---

(1) Examination of lands. (2) Dewan Pattabhirama Row. (3) The Governor of Madras.

सोयं स्वभावरमणीयगुणाभिरामः
स्वीयं पदं समधिरुह्य ततः क्रमेण ।
क्षोणीमवेक्ष्य परितोप्यथ मन्त्रिकृत्यं
क्षोणीपतेर्हितमवेत्य चकार तत्तत् ॥ २४ ॥

भूयो निरीक्ष्य नवधूमरथं स धीमान्
भूलोकनाथमपि भूरिगुणप्रतापम् ।
दूरादिहत्यनृपतेर्भुजनेजसः किं
धूमोयमश्नाति भुवीत्यतनोद्विशङ्काम् ॥ २५ ॥

एतादृशेनलरथेधिगते यथेष्टं
भूलोकपालकमणेः किमपि प्रशस्तम् ।
यातव्यमप्यभवदाशु पदं सुदूर-
मायत्तनाभसरथस्य यथेन्द्रमौकः ॥ २६ ॥

हा पूर्वभस्य धरणीरमणस्य मातु-
र्निर्याणवत्सरत एव दिवं गता सा ।
विक्टोरियेति महितांगलभूमिनाथा
पुत्रे निधाय (1) निजां धुरमब्धिकाञ्च्याः ॥ २७ ॥

शान्तिप्रियस्स खलु सप्तमशब्दयुक्ता-
मेड्वर्ड्प्रथामथ बहन्निह चक्रवर्ती ।

---

(1) Edward VII.

पट्टाभिषेकमखिलक्षितिपैस्सहैच्छत्
कर्तुं निजं सपादि कर्षमुखेन दिल्याम् ॥ २८ ॥

कर्षप्रभोरथ निमन्त्रणमेष मोदात्
स्वीकृत्य भृत्यानिपुणैः पुरतः प्रणुन्नैः ।
तत्तत्स्थलेषु परिक्लृप्तनवोपकार्यः
प्रस्थातुमैच्छदयसूचितभाविभव्यः ॥ २९ ॥

सर्वाधिकारिसचिवाग्रिपसैन्यनेतृ-
मुख्यैस्स्वकैः परिवृतश्शुभदे मुहूर्ते ।
निर्गत्य सद्रथवरेण पुरोत्तमात् स्वा-
न्मर्त्येशमौलिरथ दिल्लिपुरीं प्रतस्थे ॥ ३० ॥

राजाग्रिमे विमलतेजासि रामनाम-
न्यारात् पुरीं सपादि तामभियातुकामे ।
तावादृतौ भरतलक्ष्मणभावनीया-
वन्वेनमीश्वरमनन्तरजावगाताम् ॥ ३१ ॥

एकस्सुकीर्तिरनुजोऽस्य परस्त्वनूनै-
र्जामातृतामपि गुणैर्गमितः क्रमेण ।

---

[१] रावणवधानन्तरं प्रत्यागतस्य श्रीरामचन्द्रस्यायोध्या-प्रस्थानमत्र प्रतीयते ।

सूनुस्स्वकीयभगिनीदुहितुस्सुशिष्या-
वेतावुभावपि सनामकतां दधानौ ॥ ३२ ॥

तावेष वत्सलतयानुजभागिनेया
वामोदयन् मधुमयैर्वचनैरनैषीत् ।
आलोकनीयविविधार्थविशेषवीक्षा-
व्यालोड्यमानमनसावनसानलेन ॥ ३३ ॥

तावत्स्ववाहनरयातिशयात् सुदूर-
धावत्समस्तनगशैलकुलामिवोर्वीम् ।
पश्यन् निवासनिलयोदरदृश्यचित्र-
भंगीश्च सोयमनयन् क्षणवद्दिनानि ॥ ३४ ॥

अक्लेशमात्मगमनोचितवाहनेन
निर्गच्छतोस्य पथि तत्र निजेच्छयैव ।
आसीद्विळम्ब इति यत्तदनेकमान्यै-
रेतद्दिदृक्षुभिरभूयत निष्फलाशैः ॥ ३५ ॥

यद्यत् पदं समवरुह्य यदा व्यभूषि
विद्वत्क्षितीशमणिना पथि तत्र तत्र ।
विद्वद्भिरप्यधिकृतैश्च तदातिधन्यै-
रभ्यर्च्य सत्प्रभुमलभ्यत चारितार्थ्यम् ॥ ३६ ॥

मुंबापुरेथ नृपतिर्विहितावतारो
विश्वोत्तरप्रचुरभूतिविलासरम्ये ।
नेत्रोत्सवोभवदिहत्यमहाजनाना-
मेतद्विभूतिरपि तन्नयनोत्सवोभूत् ॥ ३७ ॥

साकं कुमारयुगळेन सहानुगोसौ
तांस्तान् विभूतिविभवानभितोवलोक्य ।
तत्रानयत् कतिचिदुत्सुकधीर्दिनानि
मित्राधिकृद्वरवणिग्भिरुपास्यमानः ॥ ३८ ॥

भूयस्स्वधूमशकटेन भुवः प्रदेशान्
गच्छन् यथेच्छमवतीर्य नृपस्स तांस्तान् ।
आभूष्य पञ्चषदिनैः पुरमाप काशी-
मालोकनोत्सवरसाकुलसर्वलोकाम् ॥ ३९ ॥

यावत् स पावकरथो निजदीर्घनादै-
र्भूवल्लभागमनमाशु जनाय शंसन् ।
नातिष्ठदात्मसदनाङ्कणमेत्य तावत्
काशीश्वरेण समुपेत्य स सत्कृतोभूत् ॥ ४० ॥

---

[१] Bombay. [२] आलोकनमत्र नृपस्य काश्याश्च ।
[३] The Maha Rajah of काशि ।

श्रीमानयं तु नृपतिस्सुकृती पुरैव
माटेश्वरागतिमवेत्य कुतूहलेन ।
सत्कर्तुमेनमतिथिं सकलान् पदार्थान्
सज्जीचकार खलु सज्जनलाव्यकीर्तिः ॥ ४१ ॥

आराद्थो रथवरेण सुरापगायाः
कूलैकभूषणमुपेत्य सुहृत्पुरं तत् ।
भूजानिरेष भुवि तामखिलार्चनीया-
मालोकयन् मुदमवाप मनस्यपूर्वाम् ॥ ४२ ॥

या निस्सृता ननु तुषारधराधरेन्द्रा-
ल्लोकत्रयीकुशलदायकपुण्यकीर्तिः ।
निश्शङ्कमेत्य परमेश्वरपार्श्वमत्र
नित्यं नितान्तमुदिता हसतीव गौरीम् ॥ ४३ ॥

भागीरथी सपदि सा शिवसेवनोत्क-
मालोक्य बाहुजवरिष्ठमिळेश्वरं तम् ।
आसेव्य सादरमभंगतरंगजातै-
स्सानन्दमाविरकरोन्नु कृतज्ञतां स्वाम् ॥ ४४ ॥

---

[१] कैलासे हि गौरीमाशंक्यैव गंगया स्थीयते । [२] अत्र हि कृतज्ञतामूलं स्वानेतुर्भगीरथस्य वंशजत्वबुद्धिस्थत्वभ्रमो वेत्यवधेयम् । तदेवोक्तं भागीरथीति ।

पापौघमोचनजलाचमनादिभिस्तां
गंगां यथावदभिषेकपदार्चनाद्यैः ।
गंगाधरं च सह सोनुचरैर्निषेव्य
नात्मानमेव कुलमप्यपुनात् कृतार्थः ॥ ४५ ॥

तत्राथ पण्डितवरैर्विधुशेखराद्यै-
र्वैदुष्यविस्मितमनोभिरुपास्यमानः ।
तान् निर्जितानपि रसात् सदसि स्वशिष्यैः
संभावनाभिरुचिताभिरतोषयत् सः ॥ ४६ ॥

लोकेश्वरेण शिरसैव हि लाळ्यमानां
लोकाधिकोन्नतगुणौघहिमाचलोत्थाम् ।
काश्चित्सुकीर्तितटिनीं विमलामयत्न-
मत्राततान स च बाहुजवंशकेतुः ॥ ४७ ॥

भूयो भयाश्चितमयं विनयोदयाढ्यो
वैकुण्ठपादमखिलार्च्यमकुण्ठभक्तिः ।
आसेव्य साधुविहितैश्चरितैः पितॄणा-
मानृण्यमार्च्छदधिनोच्च धनैर्द्विजालीम् ॥ ४८ ॥

---

[१] तदानीन्तनेषु तत्रत्यपण्डितेष्व[illegible] ।
[२] चक्रवर्तिना शंभुना च ।

प्रस्थाय भूपतिरसावथ कोळिपट्ट-
प्रख्याश्रिते पुरवरे विहितावतारः ।
प्रत्युद्गतोत्र विविधाधिकृतैः पुराधि-
भर्त्रादिभिस्सरसमेलत तादृकृतीः ॥ ४९ ॥

द्वित्राणि तत्र च दिनानि सह स्वकीयै-
र्नीत्वा विशिष्टविभवार्थविकृष्टचित्तैः ।
भूयस्त्ववीक्षणकृतार्थजनार्च्यमानः
प्रायात् कुबेरदिशमेव कुबेरकल्पः ॥ ५० ॥

आसाद्य सोथ मधुरां मधुसूदनांघ्रि-
न्यासात् प्रभृत्यधिकमार्यजनार्च्यमानाम् ।
आलोक्य सूर्यतनयां सरितं च कृष्ण-
क्रीडावशादिव सुनीलजलां ववन्दे ॥ ५१ ॥

वृन्दावने स विचरन् सहजादिभिर्गो-
वृन्दावनेन जगति प्रथितो विशेषात् ।
मन्दारतां च सुकृतिष्वसकृद्वितन्वन्
नन्दात्मजोत्सवशुभमन नवीचकार ॥ ५२ ॥

---

[१] Calcutta. [२] वाचां निचयेन यत् अनर्घमिमं तर्मं धेनुसमूहसंरक्षणेन च ।

एवं बहून् सुचरितैश्चरिताम् प्रदेशा-
नासेव्य पुण्यनिकरोद्यदवर्ण्यतेजाः ।
दिल्लीं नृपेन्दुरभिषेकदिनात् पुरैव
कर्षादिरातिशयहार्पितहृद्विवेश ॥ ५३ ॥

संवीक्ष्य तां पुरमिहावसति क्षितीशे
सर्वे च भूमिपतयः क्रमशस्समीयुः ।
सत्क्षत्रतेजसि लसत्यलमत्र राज्ञि
नक्षत्रताम्बरभूमिभृतो व्यतन्वन् ॥ ५४ ॥

सोयं विधाय च विधीन् विधिवद्विधेयान्
कर्ष सदोगतमुदारमुदा सदारम् ।
साकं नृपैस्समयतो विहिताभिषेक-
माङ्गल्य तेन च यथोचितमार्चितोभूत् ॥ ५५ ॥

तावत्सदस्यखिलभूपसमक्षमेष
भूवल्लभोलभत दुर्लभमन्यमान्यैः ।
सम्राज एव बिरुदं किल "झी.सि.ये.स्सै-
रूपं विशेषमहितः क्व न तादृशस्स्यात् ॥ ५६ ॥

---

[१] नृपे चन्द्रे च । [२] The title of G. C. S. I.

अभ्यागमे च पुरवासविधौ च संसत्
सम्मेळने च सकलाभिविसर्जने च ।
कर्षोत्र राज्ञि विततान विशेषदाप्ति-
मेतन्न चित्रमपि सोस्य गुणैर्हि कृष्टः ॥ ५७ ॥

भूयश्च हर्षवशकर्षमहीयमानः
कांश्चिद्विनाय दिवसान् कुतुकेन दिल्याम् ।
अन्योन्यदर्शनसुखाहृतभारतीय-
भूपालवीरपरिलालितभूरिवीर्यः ॥ ५८ ॥

आपृच्छ्य सोथ सकलानधिभर्तृमुख्यान्
विख्यातनूतनयशोभरदर्शनीयः ।
[३]पट्टाभिषेकपुरतः प्रतिगन्तुमैच्छत्
पट्टाभिरामसचिवादिभिरात्मदेशान् ॥ ५९ ॥

प्रत्यागमे च कतिचिद्विषयान् विभूष्य
निर्गच्छतोस्य शाकटस्य मरुत्सखाङ्कः ।
गोश्रीजुषां तदनु लोचनगोचरोभूत्
स्वीयेश्वरागमनसंविहितोत्सवानाम् ॥ ६० ॥

---

[१] कर्षः । [२] नृपस्य [३] दिल्लीनगरात् ।

भूमाश्रितस्स तु रथोयनमीक्षणस्य
येषामियाय मनुजप्रवराधिरूढः ।
तेषामभूत् सपदि लोचनचारितार्थ्यं
सान्निध्यतो हि महतां सकलं सुखाप्त्यै ॥ ६१ ॥

मेघागमोत्सुकितचातकवज्जनौघाः
प्रागेव पथ्युपगताः कतिचित् क्षितीशम् ।
आलोक्य तत्तदुचितार्हणमाचरन्तः
स्वामिप्रसादमलभन्त कृपाकटाक्षम् ॥ ६२

सीमालयं तमृषिनागतटाकदेश्य-
मासाद्य धूमशकटो निविडं जनौघैः ।
नाथावलोकनरसाकुलितात्मभिस्सं-
बाधासहिष्णुरिव सोऽतितरामरोदीत् ॥ ६३ ॥

संस्थाप्य तं रथमथाश्वयुगोह्यमान-
मारुह्य सैनिकमहाजनमान्यवर्यैः ।
पर्यावृतो विविधमंगलघोषभूषा-
मागत्य तां निजपुरीमविशत् महूहः ॥ ६४ ॥

---

(1) Ernakulam.

तत्राखिलैरवरजैर्भगिनीसुतैश्च
सानन्दभक्तिभरमेत्य महीयमानः ।
विस्तीर्णचत्वरमुपेत्य वरासनस्थः
सन्दर्शनाय मिळितानधिनोत् समस्तान् ॥ ६५ ॥

सर्वेऽपि ते नृपमवेक्ष्य विभूतिभूषं
काषायवासंसमुदूढनवप्रभावम् ।
दिल्लीप्रयाणमिषतः कृततीर्थयात्रा-
पुण्यक्रियं स्वयममंसत सम्प्रहृष्टाः ॥ ६६ ॥

तान् वाग्भिरप्यवनिपस्स्वमुखोदिताभि-
स्सन्तोषयन् विविधवृत्तविचित्रिताभिः ।
नानामताचरणवेषधरानपि द्रा-
गेकत्र हि स्नपयति स्म स विस्मयाब्धौ ॥ ६७ ॥

पूर्णत्रयीशमथ तं कळभाभिषेक-
दीपोत्सवैरखिलविस्मयदायिघोषैः ।
आराध्य तत्पदपयोरुहयोः प्रणम्रः
प्राप प्रकृष्टतरमेष नृपः प्रसादम् ॥ ६८ ॥

भूयस्स मातृवदवेक्ष्य महीश्वरीस्ता
वर्षाधिकास्सपदि हर्षपयोधिमग्नाः ।

---

[१] वयोधिकाः ।

गंगाजलैश्च कनकाकलिताक्षमाल्यै-
रासां शिरांसि च गळानतनोत् सुधन्यान् ॥ ६९ ॥

काश्चित् पुनस्स्वजननीकरुणाविशेष-
पात्रायितामिह चिराज्जरठां च शूद्रीम् ।
आनाय्य मातरमिवैव कृतादरोसौ
गंगाक्षमाल्यपरिपूततनुं व्यतानीत् ॥ ७० ॥

तां हर्षविस्मयविशेषविकासगंगा-
तोयाभिषेकपरिहृष्टतनूरुहाङ्गीम् ।
सर्वेप्युदीतबहुमानमवेक्षमाणा-
राज्ञो गुणांश्च सुकृतं च शशंसुरस्याः ॥ ७१ ॥

पुनरथ महाराज्ञीप्रीत्यै तदीयगृहं गतो
विशदलिपिमुद्राङ्कं हैमं तनुच्छदतल्लजम् ।
वपुषि निदधत् सम्राड्प्रेमेव मूर्तिमुपागतं
सकलनयनानन्दं कुर्वन् न्यवर्तत पार्थिवः ॥ ७२ ॥

एवं पट्टाभिषेकोत्सवमवनिपतिस्सार्वभौमस्य नन्दन्
देशे देशे वितन्वन् हिमकरकिरणस्पर्द्धिनीमेव कीर्तिम् ।
कारुण्येनापि धिन्वन् पदकमलसमासेविनो नीतिरक्षा-
नैपुण्येनावनीं स्वां नवनवकुशलैर्नूतनीकृत्य रेमे ॥ ७३ ॥

इति श्रीरामवर्मविजये नव्यकाव्ये
दिल्लीप्रवेशो नाम षष्ठस्सर्गः
॥ समाप्तः ॥

॥ सप्तमः सर्गः ॥

भूजानिस्त्वथ नवयौवनोदयानां
कन्यानां निजकुलमूलिकायितानाम् ।
आसन्ने सपदि विवाहमंगळे त-
न्निर्वोढुं मतिमतनोदनूनसत्त्वः ॥ १ ॥

लोकेषु श्रवणपुटागताथ सेयं
भर्टेशोचितशुभनिश्चयोत्थवार्ता ।
कालेऽस्मिन् मलयजपङ्कयोगरम्य-
प्रालेयद्रवपरिषेकहर्षमाधात् ॥ २ ॥

भूदेवास्तदनु विशेषतः प्रहृष्टा-
भूलोकेश्वरभगिनीसुताविवाहे ।
अभूवं निजकुलनिस्स्वतां वरत्वे-
नाहन्तुं किल विधुतान्यचिन्तमैच्छन् ॥ ३ ॥

---

[१] द्रव्यासु व्यवसायेषु सत्त्वमित्यमरः ।

कन्यानां परिणयनेऽत्रकेरळीया
भूदेवाः खलु परमाहिताधिकाराः ।
इत्येते कतिचन तद्वरत्वलाभा-
दत्येतुं धनदमपीशते हि भूत्या ॥ ४ ॥

पञ्चासन्निह नृपकन्यकास्सुरूपाः
पञ्चासन्नुचितवराश्च निश्चितास्ते ।
पञ्चास्त्राण्यपि नु रसाद् गृहीतुमैच्छत्
पञ्चात्मा विषमशरस्समेषुवाप्त्यै ॥ ५ ॥

मासाख्ये महति महे पुरा यथास्मिन्
देशेभ्यस्समुपहृतास्सुदूरगेभ्यः ।
सारार्थास्सकलतयात्र चैवमासन्
द्वित्रैस्तत्र तु दिवसैरिवो मुहूर्तैः ॥ ६ ॥

नानालंकृतिविरुचिराणि सत्पदार्थै-
राकीर्णाखिलजनादृतान्तराणि ।
अत्रारान्नवसदनानि चित्रबन्ध-
श्रीरम्याण्यदधत भव्यकाव्यलक्ष्मीम् ॥ ७ ॥

---

[१] स्मरसुन्दरा वराः कन्दर्पास्त्रवत्मोहनाश्च्यः कन्यका-श्चेति भावः । [२] इदानीं धूमरथप्रचारादयं भेद इति बोध्यम् ।

यैर्दृष्टं तदनु विवाहमंगळार्हं
श्रीजुष्टं सदनमनर्घचित्रशिल्पैः ।
आविष्टं सुरभिलभूमि तं त्वमुष्मिन्
नो दृष्टं सुरपुरमित्यदस्स्वदुःखम् ॥ ८ ॥

मासाख्यस्स खलु यदोत्र मासि सिंहे
प्रागासीदयमपि नात्यगात् क्रमं तम्[1] ।
तत्राह्नां नियमभून्महोत्सवोद्धा-
स्वथासीद्द्विगुणमिदं स एव भेदः ॥ ९ ॥

एकत्र प्रसृमरमंगळार्हघोषै-
रन्यत्र प्रचलितसत्क्रियाविशेषैः ।
क्वाप्यञ्चन्नृपतरुणीमनोज्ञवेषैः
क्वाप्यार्यानुतिनिनदैर्निरस्तदोषैः ॥ १० ॥

दानैः क्वाप्यघपटलीविलोपदक्षै-
र्गानैः क्वाप्यखिलविनोदवृद्धदीक्षैः ।
भोज्यैः क्वाप्यतुलमसद्रसैर्विचित्रैः
पूज्यैः क्वाप्यवनिसुरोद्वहैः पवित्रैः ॥ ११ ॥

---

[1] अयमपि सिंहे मास्येवाभूदित्यर्थः ।

सुश्राव्यैः कळकळनिस्वनैः कुताश्चित्
सुश्रोणीजनकृतकेळिभिः कुताश्चित् ।
हुंकुर्वत्पटुभटचंक्रमैः कुताश्चित्
संघोर्वीसुरवरनर्तनैः कुताश्चित् ॥ १२ ॥

संभाव्यं पुरमिदमाज्ञया नृपेन्दो-
र्मन्त्रीन्द्रोप्युपसचिवैस्सहाभ्युपेत्य ।
सम्पूर्णं विविधशुभैर्दिवापि रात्रौ
संरक्षन् षडहमयापयद्विनिद्रः ॥ १३ ॥

कालेस्मिन् कनकपरीतरत्नभूषाः
कन्यास्ताश्शुभदमुहूर्तबद्धसूत्राः ।
रत्नांगीरपि रुचिरांबरैर्विलोक्याः
सत्रेमुस्सचिवजनास्सहोपहारैः ॥ १४ ॥

इत्येतन्महमवनीश्वरोतुलश्रीः
प्रत्येकप्रणिहितधीः प्रशस्तरीत्या ।
निर्वर्त्य प्रभुवरभूसुरान् यथावत्
प्रस्थाप्य प्रमुदितधीः पुरेव रेमे ॥ १५ ॥

अत्राथो नृपतिरनर्घरत्नभूषो
हस्तर्क्षे विहितविशेषघोषयात्रः ।

---

[१] कैरळ्यां "अत्तच्चमया"ख्या सुप्रसिद्धेयं घोषयात्रा ।

सोदर्यादिभिरुचितांगभूषणाढ्यै-
रन्वासेव्यत विचलत्कृपाणहस्तैः ॥ १६ ॥

पार्श्वायामिह तु सर्वाधिकारिवीरा
गौरोपा अपि कलितायुधास्सुवेषाः ।
आसेव्येश्वरमचरन् करीन्द्रदन्त-
स्वर्णालंकृतनरवाह्यवाहनस्थम् ॥ १७ ॥

अग्रेमुं समदगजैश्च केपि केचि-
त्तुंगैरुल्लसदसयोश्वतल्लजैश्च ।
साटोपं सुरुचिरकञ्चुकाश्चरन्तो
भेजुस्ते नाळिकधराश्च मन्वसंख्याः ॥ १८ ॥

मन्त्रीन्द्रोप्यसिरुचिराञ्चितात्मवेषः
पद्भ्यां स क्षितिपमणेः पदोपकण्ठे ।
व्यावल्गत्करफलितासितल्लजश्री-
र्भक्त्यालं विनतशिराश्चरन् सिषेवे ॥ १९ ॥

तावत् सत्वरविचलद्दिदृक्षुलोक-
व्यालोलज्जलधिनिरोधिसैन्यसेतु ।
पश्यंस्तत्पुरमभितो निवृत्य सर्वान्
व्यापाञ्चादिभिरभितोष्य स व्यमुञ्चत् ॥ २० ॥

भूयश्श्रावणमहमप्यशेषलोकैः
प्रायः केरळभुवि सर्वतोऽनुवर्षम् ।
आदृत्यादृतमुचितोपचैर्यथावत्
भूमीन्द्रस्तदनु चकार सेतुयात्राम् ॥ २१ ॥

सोऽयं भूतलबलशासनो हि पूर्वं
सम्राजस्सदसि समागतेन तेन ।
श्रीवञ्चिक्षितिपतिना निमन्त्रितोऽभूत्
स्वागत्या मम च विभूष्यतां पुरीति ॥ २२ ॥

रामेशं जिगमिषतस्स्वतोऽस्य राज्ञ-
स्तच्चासीत् क्षितिपनिमन्त्रणं सुसाम्यम् ।
मैत्री यच्चिरमिह मातृवञ्चिभर्त्रो-
र्विख्याता परमनयोः पुनरसुकीर्त्योः ॥ २३ ॥

रामाख्यो नरपतिरेष सानुजस्स-
न्नामोदान्निजसचिवोपसेव्यमानः ।
प्राप्तायां शरदि सह स्वकैश्शुभेऽह्नि
स्वैरं दक्षिणजलधिं प्रति प्रतस्थे ॥ २४ ॥

---

[१] श्रीरामचन्द्रस्य लङ्काभियानमिदमत्र स्मर्यते ।

आनन्दं पथि जनयन् महाजनाना-
मारुह्य ज्वलनरथं स भूरिदेशान् ।
आलोक्य स्फुटरुचि मद्रभर्तुरारा-
दातिथ्यं सदनमितस्सुखं स्वयक्रापीत् ॥ २५ ॥

सोयं सद्गुणनिधिरा[2]खिलः प्रहर्षात्
स्यीयं तं नवमतिथिं समीक्ष्य तैस्तैः ।
सत्कारैः परमधिनोदनन्यसाध्यैः
[3]कुत्रैतादृशि विमुखस्सुधीः पृथिव्याम् ॥ २६ ॥

आपृच्छ्य क्षितिरमणोऽथ पूणदं तं
हौणीमत्र हि पठता सनामकेन ।
साकं सद्गुणनिधिना स्वभागिनेये-
नानन्दात् पुनरपि निर्ययौ नृसिंहः ॥ २७ ॥

श्रीरंगादिषु नगरेषु यत्र यत्र
श्रीरंगायितवपुरेष लोकनाथः ।
आवासं व्यतनुत तत्र तत्र धन्या-
स्तेवासंगतकुतुकाः परं ननन्दुः ॥ २८ ॥

---

[१] प्राप्तः । [२] The Lord Apti [३] एवंविध-गुणगणसम्पन्नान् सत्कर्तुमेव सुधियां सर्वेषामाभिमुख्यं स्यादिति भावः ।

रामेशान्तिकमुपगम्य सागरं तं
वीक्ष्याश्चेद्रसमथ दक्षिणं गंभीरम् ।
आक्रान्ताखिलदिशमीड्यवाहिनीशं
मैत्रीं तामनुपदमस्मरन्नरेन्द्रः ॥ २९ ॥

तीर्थेष्वाकलितनिषेवणक्रमस्तां
संयोज्य स्वयमथ जाह्नवीं यथावत् ।
विश्वेशे गिरिदुहितुश्च मोदमुच्चै-
र्गौरीशो व्यतनुत सोऽतुलप्रभावः ॥ ३० ॥

सेतुं तं खलु जलराशिरोधदक्षं
वीक्ष्याराद्दिनकरवंशकीर्तिकेतुम् ।

---

[१] सगरसुतैः खातं तत्कुलजं च । [२] उल्लोलसलिलं उल्लसदनुपमानन्दं च । [३] दक्षिणदिग्भवं औदार्यशालिनं च । [४] अगाधं गूढाभिप्रायं च । [५] जलेन यशसा च । [६] स्तुत्यनदीनाथं प्रशस्तसेनानायकं च । [७] स्वपूर्वजसादृश्यमिति यावत् । [८] काश्यानीतेन गंगाजलेन रामेश्वरमभिषिच्य गौरीमपूजयत् शंभोर्गंगासंयोजनेन गौरीप्रसादनमतुलप्रभावशालिनामेव साध्यमिति भावः । [९] समुद्रनिरोधनिपुणं मूढसार्थनिवारणसमर्थं च । [१०] रामचन्द्रविरचितत्वात् सूर्यवंशसंबन्धित्वाच्च । माटनृपाणां हि सूर्यवंशजत्वं लोकप्रसिद्धम् ।

सोऽनन्दत् स्वयमनगास्तु तस्य बाहो-
स्साश्चर्यं ब्रत सुतराममन्वतास्मिन् ॥ ३१ ॥

सौमोधिस्सह भगिनीसुतानुजाभ्या-
मायातं नरवरसैनिकैः परीतम् ।
आरूढस्स्वतटमवेक्ष्य रामवर्मे-
त्याख्यातं नृपमधिकं भियेव भेजे ॥ ३२ ॥

कर्तव्यं सकलमिहापि साधु कृत्वा
विस्तीर्णैर्विहितघनाघनालिकृत्यः ।
तैस्तैः सत्प्रभुतिलकैरुपास्यमानो
मार्गेष्वप्यगमदनन्तभूमिसीमाम् ॥ ३३ ॥

वाश्चिक्ष्मारमणमणिस्स माटभूप-
स्याविथ्यैस्सुभृशमनेकशः प्रहृष्टः ।
आदत्य क्षितिपमिमं हि चारितार्थ्यं
स्वीकर्तुं सकृदतिकौतुकादथैच्छत् ॥ ३४ ॥

स्वाराज्यं भुवि हि वहन् स वाश्चिराज-
स्स्वां राज्यश्रियमपि नूतनातिथिं तम् ।

---

[१] वञ्चिभूमिसीमाम् ।

सत्कर्तुं विभुवरसो न्ययुंक्त किं यत्
सर्वे तत्सचिवभटादयोऽत्र दृष्टाः ॥ ३५ ॥

श्रीवञ्चिक्षितितलसीम्नि सज्जितानां
कालेऽस्मिन् निरुपमवाहनादिकानाम् ।
संख्यानं गुणगणवर्णनं च कर्तुं
नेच्छा मे विफलकृतिर्हि सन्निषिद्धा ॥ ३६ ॥

माटोर्वीपरिवृढवाहनावलोके
वाञ्चिक्ष्मावरसचिवप्रणामशंसी ।
अत्युच्चैर्नवनलिकास्वनोऽभ्युदञ्चन्
दिक्चक्रं लघु मुखरीचकार दूरम् ॥ ३७ ॥

धीरास्ते सचिवगणास्त्वथोपचारै-
राराक्तं नृपमुचितैर्निषेव्य सेव्यम् ।
तस्यां धुर्युदभितरत्र दुर्लभा किं
श्रीमूलक्षितिरमणस्य वस्तुसाध्यम् ॥ ३८ ॥

वाञ्चिक्ष्माबलमयनं विलोक्य तैस्तै-
राश्चर्यैः फलदिभवैर्विभाव्य लोकम् ।
श्रीराज्याञ्चितमथ पद्मनाभमुख्या-
नावासान् पथिषु विभूष्य सानुगोऽयात् ॥ ३९ ॥

यात्रायामिह खलु माटवञ्चिभूभृत्-
सैन्याळीसचिवकुलोघमाश्रितायाम् ।
आगत्यान्तिकमखिलैः कुमारयुक्तो
भूपोयं धृतकुतुकैर्व्यलोकि लोकैः ॥ ४० ॥

सा वञ्चीश्वरनगरी तु माटभूप-
स्याकर्ण्यागमनकथां कुतूहलेन ।
विस्मृत्य स्वपतिमपि प्ररूढरागं
स्वीकर्तुं सपदि समुद्यतेव तस्थौ ॥ ४१ ॥

तां वीक्ष्य प्रचुरविलासपेशलांगीं
कामप्याश्रितसुषमामिहावहन्तीम् ।
आमोदोद्गमविहितादरातिरेकां
भूपोसावपि मुदितस्समाससाद ॥ ४२ ॥

वञ्चीशस्स च पटुधीर्नवातिथिं तं
वैशाखे सदकुरुतोरुधाम्नि सौधे ।
शक्त्या चोन्नतयशसापि निर्विशेषं
निश्शेषव्यसननिवर्तकाद्विशाखात् ॥ ४३ ॥

---

[१] विशाखमहाराजस्य स्वर्गारूढस्य प्रासादे ।

अन्योन्येक्षणसहवासभाषणाद्यै-
स्तावुद्यद्रसमथ माटवञ्चिभूपौ ।
द्वित्राणि क्षणवदहानि पद्मनाभ-
श्रीपादांबुजभजनोद्यतावनैष्टाम् ॥ ४४ ॥

साहित्यप्रकटनसौकरीविशेषा-
द्भासीच्चतुरकुमारकान्वितस्य ।
तस्याग्रे बत यदुपेत्य कालिदासः
प्रीतिं पाणिनिरपि कैरळो ह्यकार्षीत् ॥ ४५ ॥

सेवार्थं स्वपदमुपागतांस्तथान्यान्
सारार्थागमकुलसिन्धुकुंभयोनीन् ।
धीराग्र्यः क्षितिपतिरर्हयन् यथाव-
न्मोदाख्ये सरसममज्जयत् पयोधौ ॥ ४६ ॥

तत्राराज्जलधितटीर्विशेषरम्या-
स्सुत्रामालयसुभगानि मन्दिराणि ।
चित्राशं विवृतकलाश्च पाठशालाः
क्षात्राग्र्यस्ससुहृदुपेत्य सन्ददर्श ॥ ४७ ॥

---

(1) Valia Koyithampuran. (2) Raja Raja Varma Koyithampuran M. A.

स्वाभिध्याय च कुलशेखरादिवीशं
सा रङ्गस्सपदि निमन्त्र्य सादरं तम् ।
आपृच्छ्य स्वयमनुगैस्सहातिहृष्टैः
पूर्णाख्यां निजवसतिं प्रति प्रतस्थे ॥ ४८ ॥

पुण्या[illegible] [illegible]भव्यभासुराणि
क्षेत्रा[illegible] [illegible]तफलानि तत्र तत्र
आसे[illegible] [illegible]सैरनन्त-
स[illegible] [illegible]धिकृतादृतोऽभ्यगच्छत् ॥ ४९ ॥

[illegible]तपथविशेषसत्कृतं न-
[illegible]न स्वपतिमवेक्ष्य प्राटभूमिः ।
आनन्दाकुलजनताविवृद्धघोष-
व्याजेनाकलितशिवस्तवेव भेजे ॥ ५० ॥

स्वावासं स तु समुपेत्य भृत्यवर्या-
नायातान् नृपकुलशेखरप्रणुन्नान् ।
संभाव्य स्वयमुचितैर्नवोपचारैः
प्रस्थाप्यारमत पुरेव पूर्णपुर्याम् ॥ ५१ ॥

एतस्याः पुर इह पूर्णवैभवायाः
पूर्वस्यां दिशि हि विभाति नातिदूरे ।

श्रीलास्याश्रितशिखरो गिरिस्सुरम्य-
स्सोमार्कानिलपरिपावितािखलांगः ॥ ५२ ॥

यस्याग्रे सुदृढलसत्सुधारसश्रीः
काचित् पुण्यसुकृतिभिः कदाप्यगम्या ।
राराष्टि स्फुटमिति किं वदन्त्यशङ्कं
यत्संज्ञां कनकपदाङ्कितां जनौघाः ॥ ५३ ॥

यस्योरास्तटभुवि सोऽप्यनन्यजारि-
र्गंगासंगमसरसोऽद्रिजासहायः ।
जागर्ति स्वपदसमाश्रितेनुजान-
र्थेशो सदयमधित्यकासुखानि ॥ ५४ ॥

देवाः किन्नरनिवहाश्चरन्ति यस्मिन्
हेमश्रीर्न हि विजहाति यं कदापि ।
पार्वत्या सततमिहाहृतः [illegible]
कस्मान्नो वहति [illegible] ॥ ५५ ॥

---

[१] अमृतं लेपविशेषश्च । [२] अत्र कैलासत्वं व्यस्यते । [३] देवतुल्यमनुष्यसंघाः देवाः किन्नरनिवहाश्च । [४] हेमशोभा हिमकान्तिश्च । [५] गौर्या नृपवल्लभया च । [६] पर्वतश्रेष्ठत्वं हिमवत्वं च ।

तस्मिन् काञ्चनशिखरिण्यशेषवास्यै
दासोऽथ क्षितिपतये क्षुधार्चिताय ।
इन्द्राय स्वयमिव यत्र पुण्यगम्या
विध्यन्ते विविधविभूतयो ह्यनर्घाः ॥ ४६ ॥

अभ्रांस्य क्षितिधरतल्लजे तमेष
प्रत्यग्राकलिताधिचिन्नभ्यसौधैः ।
विस्तीर्णं परिसरमण्डलं समन्ता-
दुद्यानैस्सुहृतुपरिष्कृतं व्यतानीत् ॥ ४७ ॥

उत्खातैः स्फटिकजलप्रांशुभिस्तटाकै-
रुद्दामैर्वरपथविस्तृतैर्विचित्रैः ।
उत्तुङ्गैः प्रतिनवमन्दिरैश्च हैमै-
स्तत्रायं स्फुटमतनोद् स्वलत्प्रतानम् ॥ ४८ ॥

श्रीलाढ्यैस्स[illegible]ननृणादिभिस्समग्रै-
स्सूनाढ्यैस्सुरभितसत्पर्णलताद्यैः ।
सामोदैः कमलकुलैश्च भूषितेऽस्मिन्
हेमाद्रौ करणसुखं किमस्त्यलभ्यम् ॥ ४९ ॥

आरामेष्विह खलु माधवी नवश्री-
रालक्ष्याजनि जनकौतुकाय नित्यम् ।

---

[१] वसन्तनूतनकान्तिः, माधव्याख्या कन्यका च ।

कालातिक्रमणनिवारणं नरेन्द्र-
स्त्वायत्तं किमुत हि पार्थिवापनेयम् ॥ ६० ॥

आघूर्णितमथ चिराद्धर्षापयान-
र्थोत्ताग्राशयमनुगुण रागयागैः ।
आखादि [illegible]
[illegible] ॥ ६१ ॥

[illegible]
[illegible] ।
शैलेन्द्र[illegible] विस्मयोत्था-
[illegible] ॥ ६२

[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ६३ ॥

[illegible]
[illegible] ।

[१] [illegible] ।

भूपालौ सविनयमादृतौ हि यूना
भूपेनाकलितमहोत्सवावविहास्ताम् ॥ ६४ ॥

याव[illegible] [illegible] नितान्तरङ्गे
व[illegible]पुरसमागमे व्यतारीत् ।
ताव[illegible] [illegible]धिकमप्यमुष्य तैस्तै-
स्सत्कारैस्समतनुतैष विज्ञवर्यः ॥ ६५ ॥

पूर्वेषाम[illegible] भूपतीना-
[illegible]कृतोपि सोयम् ।
नैता[illegible]-
[illegible] मुदान्धैः ॥ ६६ ॥

का[illegible] कुतुकादुपागतोऽस्मिन्
गोश्रीशं विभुमवलोक्य विस्मितोऽगात् ।
गङ्गायामिव समलब्ध साधुसेव्य-
स्सारांशो यदिह सरस्वतीरसेपि ॥ ६७ ॥

पृथ्वीशः पुनरिह सह्यभूधरस्था-
नुत्तुंगांस्तरुनिकरान् जनोपकृत्यै ।

---

[१] वाणीरसे सरस्वत्याख्यान्तर्वाहिनीजले च ।

आनेतुं कृतमतिरग्रियानमेकं
निर्दोषं निजविषये निधातुमैच्छत् ॥ ६८ ॥

पट्टाख्याभिळदभिरामनामधेयो
मन्त्रीन्द्रस्स च मनुजेश्वराशयं तम् ।
विज्ञाय व्ययमथ वित्तसञ्चयानां
कृत्वारादयनमचीकरत् सुदीर्घम् ॥ ६९ ॥

सम्पन्नेष्वथ सकलेषु साधनेषु
क्षोणीन्द्रस्त्वयमथ मद्रमण्डलस्य ।
भर्तारं ननु कृपयाऽमुकं निमन्त्र्य
प्रस्थानं सपरिजनोऽतनोद्वनाय ॥ ७० ॥

मार्गान्तिनाखिलसत्तटः पुराब्धे-
र्व्याक्षेपादथ च वनाद्गतो व्यलोकि ।
एकं नासहत विभुस्स रोमशर्मा
नान्यत्र सम्प्रति वनगेष रामशर्मा ॥ ७१ ॥

घोरं तद्वनमचलेन्द्रतुंगशृंग-
ध्वान्तस्येष्वरुणसुधाकरप्रचारे ।

---

[१] कानने गन्तुं च । [२] आर्यमरामः ।

अस्पृष्टातपलवचन्द्रिकान्तरत्वा-
दश्रान्तप्रसृततमस्समावृताङ्गम् ॥ ७२ ॥

व्याधेन्द्रैः क्वचन निगृह्यमाणहिंस्रं
हिंस्रैः कुत्रचिदभिहन्यमानसत्त्वम् ।
सत्त्वैः क्वाप्यनिशमुपास्यमानदुर्गं
निर्गच्छद्बहुविधनिर्झरं कुतश्चित् ॥ ७३ ॥

ब्रह्माङ्गं तदिव मुखैर्विभिन्नदिक्कं
विष्ण्वङ्गं नु किमुदरस्थसर्वसत्त्वम् ।
शंभ्वङ्गद्युति फणिषण्डमण्डितं त-
द्वीक्ष्योर्वीपतिरतिकौतुकाद्विवेश ॥ ७४ ॥

कान्ताराण्यथ नृपतेः प्रवेशतोऽस्मिन्
कान्तान्युज्ज्वलमणिमन्दिराण्यभूवन् ।
शैलेन्द्रे सलिलनिधौ महावने वा
नैवाज्ञा खलु विफलेश्वरप्रयुक्ता ॥ ७५ ॥

मद्रेशस्स च कुतुकी निमन्त्रणं तत्
भूजानेर्भृशमभिनन्द्य मार्गतोऽस्य ।
भृत्याग्र्यैस्सविनयमादृतः प्रहृष्ट-
स्तत्रागात् सपरिजनो वनोपकण्ठम् ॥ ७६ ॥

तावुद्यत्प्रणयभराकुलान्तरंगा-
वन्योन्यं परमभिनन्द्य लोकवन्द्यौ ।
सञ्चारैस्सततमितस्ततो विशेष-
प्रेक्षाभिर्हृतमनसाववधारमेताम् ॥ ७७ ॥

धीरौ तौ नळिकधरौ वने चरन्ता-
वाविष्टातुलमृगयोद्यमौ सुवेषौ ।
व्याधावद्बहुविधहिंस्रनिग्रहोत्कौ
वैलक्ष्याद्विपिनचरैर्व्यलोकिषाताम् ॥ ७८ ॥

आरण्यैर्जनपदजैश्च भृत्यवीरै-
राहारैरुपकरणैश्च तत्र तैस्तैः ।
आनन्दाकुलमनसाविमौ नरेन्द्र-
द्वैप्येन्द्रौ त्रिचतुरवासराननैष्टाम् ॥ ७९ ॥

प्रस्थाने प्रभुरयमाश्लिलः प्रशंस-
न्नुत्थानं शुचि शकटस्य तन्नवीनम् ।
भूमीन्द्राशयमनुसृत्य तत्प्रचार-
स्यारम्भं विदधदथाखिलार्चितोऽगात् ॥ ८० ॥

सम्राजस्सुतमथ वीक्ष्यमद्रपुर्या-
मावासं निजमुपगम्य तेन दृष्टः ।

---

(1) Prince of Wales.

सामान्यस्सुबहुगुणान् विशेषरम्या-
नालोक्यारमत परं युवेश्वरेस्मिन् ॥ ८१ ॥

पट्टाधां निजसचिवे तदाभिराम-
प्रख्याति नरपतिरैक्षतान्वितार्थाम् ।
यत् सर्वास्वपि च सभासु संगतानां
सम्मोदं समतनुतैष सन्मुखश्रीः ॥ ८२ ॥

प्रत्यागत्य प्रगळितमथो मन्त्रिणः कालमालो-
च्यैनं मुञ्चन् सदयमुदयद्भूतिराहृत्य नीत्या-
धिपाहूदं विदितसुजनश्लाघ्यवृत्तं युवानं
वीणाञ्जिं कञ्चन बुधनुतो भूपतिस्तत्पदेऽधात् ॥ ८३ ॥

सोयं स्वारुह्य नौतिं दृढतरणिमुदञ्चद्यशोवारिराशि
क्रीडालोलोनुवेलं विरचितकुशलान्मण्डलान्मद्रभर्तुः ।
आगत्यारात् स्वसेवोचितभवनिभृतं वीक्ष्य कञ्चिद् कृतार्थ-
स्स्वैरं तांस्तान् विलासान् व्यतनुत सुमनःप्रीणनान् दूर्णकान्यः ।

इति श्रीरामवर्मविजये नव्यकाव्ये
दिग्विजयारंभो नाम सप्तमस्सर्गः

॥ समाप्तः ॥

---

[१] Dewan A. R. Baherji. [२] सुचिरं समुद्रतीर-
तरणिमारुह्य विहरन् यथा कस्यचित् संसेव्यस्य गिरेर्दर्शनात् कृता-
र्थो भवति तद्वदिति भावः ।

॥ अष्टमः सर्गः ॥

दिवा नयं निशि च मनस्यनाकुलं
विभावयन्नयमवनीश्वराशयम् ।
कदापि नो विजहदुदारविक्रमः
सदादृतो जगति बभार भूभरम् ॥ १ ॥

महानयं द्विजमिथुनात्तु वंगजा-
दजायतान्नतमतिरांगलक्षितौ ।
सरस्वतीं सरसमधीत्य तज्जुषां
समार्जयत्सकलकलासु नैपुणीम् ॥ २ ॥

परीक्षया पुनरय "मैसियेस्सि" ति
प्रसिद्धया विजयमवाप्य दुर्लभम् ।
युरोपजैरपि खलु विस्मिताशयै-
रपूजि यद्गुणनिवहोऽस्य निस्तुलः ॥ ३ ॥

---

[१] दिवा निशि च अहोरात्रम् ।

तथाविधं सुधियमिमं स मातृभू-
वलान्तकस्सचिवमवाप्य सारवित् ।
भुवो भरं चिरविधृतं ननु क्षणा-
दधो दृढं निहितममन्यतात्मनः ॥ ४ ॥

स तूद्यमानवनिपतेः फलोन्मुखा-
नवेक्ष्य नान्विह विविधान् विशेषतः ।
विभूषयन् निजनयनैपुणेन ता-
नपोषयल्लघु नृपकोशमन्दिरम् ॥ ५ ॥

कृशानुवज्ज्वलति नवेत्र मन्त्रिणि
क्षणादृणं तृणवददृश्यतां ययौ ।
इदं किमद्भुतमवनी वनी च यत्
फलान्यलं ददतुरुदीतसम्पदौ ॥ ६ ॥

परिष्कृतीः पठनगृहौषधालय-
क्रियादिषु प्रतिनवनीतिरीतिभिः ।
प्रचारयन् प्रतिदिवसं प्रजामनः
प्रसादयन् नृपमयमन्ववर्तत ॥ ७ ॥

विशोधयन्नयमधिकारमन्दिरा-
ण्यशेषतो विहितविशेषनिश्चयः ।
प्रजाहिते नृपतिहिते च कर्मणि
प्रकाशयन्नयतत जागरूकताम् ॥ ८ ॥

कुमारकानविशयमालये क्वचि-
न्निवेशयन्नथ विनयव्यवस्थया ।
विशेषतोऽतनुत मुदं स भूपते-
रशोभनः क्व नु सुधियां नवोद्यमः ॥ ९ ॥

करग्रहादथ रमणस्य सर्वत-
स्समुन्मिषत्पुलकवृतेव मेदिनी ।
कृषिश्रिया खलु परितोऽधिकं बभा-
वसूत च प्रतिनवसस्यसन्ततीः ॥ १० ॥

प्रदर्शनं किमपि नवीनमादध-
द्विबोधयन् विविधपदार्थसद्गुणान् ।
विदेशसञ्चरणफलान्यदूरतो
दिदेश स स्फुटमिह सर्वदेहिनाम् ॥ ११ ॥

अथार्चितो जगति हि भारतेऽग्रिम-
श्चमूपतिस्सपदि स किच्चनर्प्रभुः ।
महाशयः किमिह गुणैरुपाहृतः
क्षमापतिं ससचिवमैक्षतागतः ॥ १२ ॥

---

[१] विद्यार्थिनो राजकुमारान् । [२] Special Palace at Ernakulam. [३] विद्याभ्यासनियमेन । [४] Exibiton. [५] Lord Kichaner.

विलोकयन् विविधसुखावहोद्यम-
स्थिराशयं नृवरमिमं च मन्त्रिणम् ।
समेधितप्रमदकुतूहलोऽभवत्
सुधीजनः खलु परभावुकप्रियः ॥ १३ ॥

स शङ्करो जगति गुरुत्वमावहन्
यतीश्वरस्सकलबुधादृतस्सुधीः ।
यदादरान्निजवसुधामुपागम-
त्तदानमन्नृपतिरसावुपेत्य तम् ॥ १४ ॥

तपोनिधिस्स च नृवरेत्र सत्प्रथा-
मुदारतां परमनघां च पाण्डितीम् ।
विनीततामपि च विलोक्य विस्मितो
विशेषतः कुशलमनुग्रहं ददौ ॥ १५ ॥

महामतिस्स च महिशूरभूपति-
र्महीमिमामगमदहीनपौरुषः ।
तदा त्वसौ नरपतिरातिथेयता-
मुदारताम पे मुदा ऽ दर्दीहशत् ॥ १६ ॥

---

[१] शङ्कराचार्यश्शृंगेरि मठस्थः । [२] The Maha Rajah of Mysore.

महाशयद्वयमथ चक्रवर्तिना
  महामहादिकविरुदेन सत्कृतौ ।
मनीषिणौ मनुजमणी निजावनी-
  विभूषिणावकलयदात्तकौतुकः ॥ १७ ॥

तयोर्गतो ऽस्य तु नृपतेस्सतीर्थ्यता-
  मनर्घधीरवनिसुराह्वयसत्तमः ।
पुरस्स शाकुन्तलकस्य शिष्यता-
  मिति द्वयोरयमतनोदतीर्थ्यम् ॥ १८ ॥

कदापि नो पञ्चभिरमीभिरीश्वरा
  दृषद्वदे महति पुरात्र केरले ।
सुधीर्न क्वाप्यत इह केरलास्पदा
  महाजना जहृषुरमन्दविस्मयाः ॥ १९ ॥

ततो नृपाद्विशिवपुरमण्डनायिते
  निजाश्रयाञ्चितसदने वसुमणिम् ।

---

[१] महामहोपाध्यायविरुदम् । [२] Narayanan Nambudirippad of Killimangalam. (3) Kodungallur Rajah of Cranganoor (4) Emperor of India. (5) Trichur

सुतां वरार्पितगळसूत्रशोभिनीं
विधातुमारभत महोत्सवं नवम् ॥ २० ॥

मतेः परं विशदतयाङ्कस्य वा
दधाति या नियतमिहा"र्मणि"प्रथाम् ।
कुमारिकाजनकुलमौक्तिकायिते-
त्यतोपि वा सकलजनाभिनन्दिताम् ॥ २१ ॥

विनीतिसत्प्रणयदयोदयादिभि-
र्मनोगुणैस्समनुकरोति याग्रजम् ।
निजाग्रजामपि सुधियस्स्वयं ययो-
र्विलोकनेष्वनुदिनमुत्सुकाः खलु ॥ २२ ॥

तथाविधक्षितिभृदपत्यमंगळ-
क्रियामहेऽखिलविबुधाधिकारिणः ।
दिगीश्वरास्स्वयमखिलेश्वरश्च न-
न्वतन्वतादरमधिकोल्लसद्रसाः ॥ २३ ॥

---

[१] आत्मनएकपुत्रीम् । [२] जलरत्नभूतमुक्तामणिप्रसिद्धिम् । [३] राजपुत्री पार्वती च । [४] विद्वत्प्रवराः देवाधिपाश्च । [५] तत्तद्देशपालकाः इन्द्रादयश्च । [६] महाराजः परमेश्वरश्च ।

स वत्सरे खलु षडशीतिपूरके
महोत्सवो दिवसचतुष्टयं शुभैः ।
विभूषयन् विधृतवधूगुणोऽतनो-
न्महीपतेः कमपि कृतार्थतोदयम् ॥ २४ ॥

चिरादयं मलिनजलाकुलाः क्षिती-
रुपायतस्सुविमलचूर्णिकापयः ।
उपानयन् विविधनिजप्रजारुजा-
मपायमप्यतुलकृपाभरोऽकरोत् ॥ २५ ॥

अपूर्वमभ्युदयमनेकधा दधत्
क्षिताविति प्रियसचिवाहृतो नृपः ।
निमन्त्रितस्सपदि किरीटधारणे
स दिल्लितः प्रचलति चक्रवर्तिनः ॥ २६ ॥

स जोर्जभूपतिरपि पञ्चमोखिल-
क्षितीश्वराधिप इह सद्गुणाकरः ।
स्वकैस्समं सदसि किरीटधारणं
चिकीर्षति स्म हि सकलान् प्रहर्षयन् ॥ २७ ॥

---

[१] सौशील्यादिः गळतलविलासमंगलसूत्रं च। [२] यन्त्रविशेषप्रयोगेण । [३] रोगनिवृत्तिम्। [४] George V.

नवोऽयमुत्सव इति भारतप्रजा-
धिपैरपि प्रभुतिलकैश्च कौतुकात् ।
विनिर्गतं क्षितिपतिरेष चानुगै-
स्समन्वितस्सचिवमुखैर्विनिर्ययौ ॥ २८ ॥

अथादरस्समुपेत्य सम्भ्रमः कुले
महादरः खलु भगिनीसुतश्च तम् ।
चतुर्दशस्सकुतुकमन्वगच्छतां
सदुद्यमं नयविनयाविताश्रितौ ॥ २९ ॥

यतोऽश्वरैस्सुविहितभूयनुग्रहः
करोऽम्बरैर्विरचितभावुकार्चनः ।
प्रजेश्वरैः पथिषु वितीर्णसत्क्रियः
क्षितीश्वरो नलनृपथाश्रितो ययौ ॥ ३० ॥

मुखीमणिस्स खलु विराटभाट् स्वयं
रथोत्तमावमतामुपेत्य संगतः ।
सहानुगैस्सदकुरुतावनाविमं
तथाविधः किमु निजहाति तादृशम् ॥ ३१ ॥

1. The Maha Rajah of Baroda.

तैदीयभूतलमथ भूषयान्वित-
स्ततो रसाद्विहितविलासचङ्क्रमः ।
वृतोऽनुगैस्सहभगिनीसुतानुजो
नृपोऽन्वमोदत विविधाः परिष्कृतीः ॥ ३२ ॥

स पूजितो जैयपुरभूभुजाऽदरा-
दुपासितः पथि नृवरेण रट्टले ।
समासदत् सुखमथ दिल्लिमण्डलं
समागमात् पुरत इहाखिलेशितुः ॥ ३३ ॥

नृपाधिपप्रतिनिधिनात्र सत्कृतो
व्यलोकत प्रतिनवसत्परिष्क्रियम् ।
पुरं स यद्यदि बलजित्पुरं पुरा
तदा त्वभूत् भुवि गुराजित्पुरं श्रिया ॥ ३४ ॥

श्रिया समं भुवि सदनुग्रहेच्छया
समागतं हरिमिव जोर्जमीश्वरम् ।

---

[१] विराटभूतलम । [२] The Maha Rajah of Jayapur. (3) Maha Rajah of Retlam.
[४] चक्रवर्तिनः ।

सदारमाहितरुचकां सकौतुकं
मुदाकुलो नरपतिरित्यनादृतः ॥ ३५ ॥

तदागतैर्हरिहयसन्निभैर्नृपैः
शताधिकैस्समरसमवेक्ष्य सत्कृतः ।
यथोचितं स्वयमपि सोभिलभ्य ता-
निहावसत् कतिचिदहानि कौतुकात् ॥ ३६ ॥

महासदस्यथ मिळितेऽखिलैर्नृपै-
र्निषेवितस्सपदि स भारतेश्वरः ।
मुदाऽकरोच्छिरसि किरीटधारणं
यथावदत्र च बिरुदार्पणं नृपे ॥ ३७ ॥

समेत्यमुं नृपमथ "ज्ञीसीयैयि" व-
र्णकाङ्कितं जगति जनाः प्रमोदतः ।
शशंसुरस्य तु सचिवोप्यधीश्वरा-
दवाप सद्बिरुदमिहात्तरत्नयम् ॥ ३८ ॥

तुतोष भूपतिरधिकं स्वमन्त्रिणो
गुणार्हणादखिलसमक्षमाहितात् ।

(1) Title of G. C. I. E.

निजोदयादपि निजसेवकोदयः
सुखाय यत् सुकृतधियां महात्मनाम् ॥ ३९ ॥

नृपाधिपाकलितसुवर्णमुद्रणो
नृपो ह्ययं सदसि समस्तपार्थिवैः ।
अनन्द्यत प्रथितविशिष्टसद्गुणे-
ष्वनादरः क्व नु जनताहितार्थिनाम् ॥ ४० ॥

अनेकधोन्नतिमथ तत्सभान्तरे
समेधितप्रमदमवाप्य भूपतिः ।
विधाय चाप्यखिलविधेयमीश्वरा-
नुमोदितस्स्वजनपदान् विनिर्ययौ ॥ ४१ ॥

हिमालयाङ्कणमनुगैश्शताधिकै-
र्हिमागमे बत गतवानयं नृपः ।
विनाऽमयं कमपि निवर्तते स्म ख-
ल्वमानुषः क्व नु महिमास्य वीक्षितः ॥ ४२ ॥

तथाविधे सुकृतिनि मार्गमध्यगे
व्यथाभवत् बत सहसातिसारतः ।
कलेस्तु दुर्ललितमिदं परीक्षितो
विलोकनादिव गतमत्यसारताम् ॥ ४३ ॥

---

[१] अस्यानुयायिनोर्नृपकुमारयोरेकः परीक्षिदिति प्रशस्यते च ।

अथाचिरात् समुपनते निजेश्वर-
प्रियागमोचितकुशलोद्धि मातृभूः ।
कदापि कौतुकमनुपेतमन्वभू-
न्मुदाकुलैः परिलसिताखिलैर्ज्जनैः ॥ ४४ ॥

पदे पदे विहितविचित्रसत्क्रियै-
स्तदा मुदार्चितशिवार्चनक्रियैः ।
महीक्षितः कुशलसमागमोऽखिलैः
प्रतीक्षितः पथिषु जनैः कुतूहलात् ॥ ४५ ॥

नृपास्थितश्शकटवरो यदाविश-
न्मुदाकुलमथ मातृभूतलम् ।
तदावनिस्स्वियमपरेव सर्वतो
व्यलोकयत प्रतिनवरत्नभूषिताम् ॥

विशेषतश्शिवपुरमेत्य संगता-
महाजना इति जनताहितैषिणा ।
प्रचोदितश्शकटवरोत्र भूभुजा
पुरेऽभ्यदृश्यत दिवसात्ययागमे ॥ ४७ ॥

---

[१] श्रेष्ठवस्तूनि ।

दिनेश्वरो जलनिधिसन्निधिं गतो
जनेश्वरो जनतातिसन्निधिं गतः।
द्वयोस्तदा किमपि हि निस्तुलं मह-
स्सरागमैक्ष्यत सकलैस्सुभावहम् ॥ ४८ ॥

उभौ नृणां मृदुकर[1]योगतस्सुखौ[2]
सुतेजसौ[3] कुमुदविलोपनोदयौ।
महाजवप्रथितरथौ च सुप्रभा-
स्त्रयो[4]नुगास्सवितुरितस्त्वसंख्यकाः ॥ ४९ ॥

तथाविधे नृवरमणावुपागते
कथा तु का कथमिव केन कथ्यते!।
प्रयाधिको मह इह येन नेक्षितो
वृथा हि तन्नयनयुगं शरीरिणः ॥ ५० ॥

रथालयाङ्कणभुवि पूर्वमागतैः
कुमारकैरुपसाचिवैः प्रभूद्वहैः।

---

[१] बलिहस्तांशवः करा इत्यमरः। [२] सुखजनकौ।
[३] भूलोकसन्तोषपोषकाभ्युदयो नृपः कुमुदविनाशकोदयस्सूर्यः
[४] माठरादयस्त्रय एवानुगास्सूर्यस्येति सुप्रसिद्धम्।

तदा नृपश्शुभनळिकस्वनश्रव-
क्षणोल्लसन्मुकुळितपाणिभिर्नतः ॥ ५१ ॥

ततो मुहुर्नळिकरवश्रवभ्रम-
त्तुरङ्गमग्रहणसयत्नसादिके ।
इतस्ततः क्षुभितमतंगजावली-
नियन्त्रणास्थिरमतियन्तृदन्तुरे ॥ ५२ ॥

समन्ततः क्षितिपनिरीक्षणोत्सवो-
च्चलज्जनोत्करधुतराजपूरुषे ।
विनिर्गळद्बहुविधवाद्यनिस्वन-
प्रकाशितप्रतिनवहर्षसंभ्रमे ॥ ५३ ॥

निजप्रजाकुलनिवहे पयोनिधा-
विव द्रुतप्रचलितवाहिनीयुते ।
समुल्लसत्परममृतांशुवत् स्फुट-
प्रसन्नगुर्नृपतिरवातरद्रथात् ॥ ५४ ॥

महाद्विजैस्सपदि विशिष्य सत्कृतो
महीपतिस्तुरगवराश्रितं रथम् ।

---

[१] परिविचलितसेनामिश्रिते तादृशनदीसंगते च । [२] प्रसन्ना वाचो रश्मयश्च यस्य ।

विभूषयत् सह सहजादिभिर्ययौ
विलोकयन् विविधशुभोदयं पुरम् ॥ ५५ ॥

मुदाकुलप्रचलितदिग्जनाकुलं
परिस्फुरत्पुरुशुभवैजयन्तिकम् ।
परिष्कृतं सुरभिविचित्रमाल्यकै-
रितस्ततस्सुरुचिरकायमानकैः ॥ ५६ ॥

क्वचिद्द्विजोत्तमकृतपुण्यकीर्तनं
विनिर्गळत्सुमधुरगानमन्यतः ।
परत्र च प्रचलितवारसुन्दरी-
सुनर्तनं सुरुचिरचित्रपत्तनम् ॥ ५७ ॥

समन्ततः प्रमदमयं विलोकयन्
शिवप्रियश्शिवपुरमत्र संगतान् ।
प्रहृष्टधीस्सकरुणवीक्षणादिभिः
कृतार्थयन् स्वगृहमिहत्यमभ्यगात् ॥ ५८ ॥

उपेत्य च स्वसदनमागतान् बहून्
स तर्पयन् मधुरवचोनिगंभनैः ।
विचित्रितैस्सरसकथाभिरध्वनां
धृतत्वरः पुनरविशद्गृहोदरम् ॥ ५९ ॥

न विश्रमेस्त्यवसर इत्यथो विदन्
दिनेश्वरं सलिलनिमज्जनोन्मुखम् ।
जनेश्वरस्स्वयमपि वीक्ष्य निर्ययौ
जलान्तिकं तनुरुचिरांशुकोज्वलः ॥ ६० ॥

कृताप्लवश्शुचिनि जले हिमानिलै-
र्हृतक्लमस्सुविहितसान्ध्यवन्दनः ।
समैक्षतात्र हि दिवसात्ययश्रियं
समस्तसज्जनमहितां हितार्थदाम् ॥ ६१ ॥

समीरणैस्तरलितवारिवीचिकै-
स्स मालतीमुकुलविभेदचुञ्चुभिः ।
सुधामयैरपि किरणैर्निशापते-
र्बुधाग्रणीर्नृपतिरसेवि सन्ध्यया ॥ ६२ ॥

समुन्मिषत्सुरुचिरतारकाञ्चिता
पुरः परिस्फुरदरुणांबरद्युतिः ।
न कस्य वा दिनविरतिः परं मुदं
जनस्य सञ्जनयति हृद्यया श्रिया ॥ ६३ ॥

---

[१] अत्र रविनृपविशेषणयोर्विभक्तिविपरिणामेनान्वयः कर्तव्यः ।
[२] वस्त्रं रश्मिश्च ।

महीपतेर्ध्रुवमनुकर्तुमुद्यता
यशःछटां दिशि दिशि चन्द्रिका स्वयम् ।
तदाचरद्विहिततमोहतिः क्रमात्
समेधितद्युतिरखिलाहृतोदया ॥ ६४ ॥

यथा नभस्थलमुडवो ददुर्मुदं
निशापतेः परिलसदाश्रितत्विषः ।
तथात्र भूरमणमणेः प्रदीपिका
विशेषतः प्रमुदितपौरदीपिताः ॥ ६५ ॥

महीपतेर्न हि परमत्र दीपिका
मुदेऽभवन्ननलमनलौषधाक्रियाः ।
अपि क्षणं बहुविथबाणपुष्पका-
द्युरुत्विडुज्ज्वलनविचित्रितांबराः ॥ ६६ ॥

अवेक्ष्य तान् विविधरसान् जनोद्यमान्
नृपाग्रणीस्सह धरणीसुरोत्तमैः ।
प्रहृष्टधीस्सुविहितमृष्टभोजनः
पुरेत्र तां ससुखमयापयन्निशाम् ॥ ६७ ॥

---

[१] तिमिरविनाशः अज्ञाननिवृत्तिश्च । [२] अनल-चूर्णप्रयोगाः Firworks.

परेद्युरस्यानुषसि कृतोचितक्रियः
पुरोत्तमं निजमथ पूर्णसंज्ञकम् ।
उपप्लुधाश्चिनपाकटेन निर्ययौ
पथि प्रजाप्रतिभिरुदाश्रितो नृपः ॥ ६८ ॥

उपेत्य तत्पुरजनगीयसंकुलं
समागतः श्रितपरिष्कृतं पुरम् ।
पृथक्पृथक्कृतविनिभुरसौ द्विजन्मे-
रस सत्कृतोविप्रदाखिलान् महर्षयन् ॥ ६९

निशाम्य चाभ्युदयकथामनेकधा
निशाम्य च प्रणतमिमं पदाङ्कणे ।
कुलाकुलस्सदहि महीश्वरोऽसनो
ननन्द भानुवदनोऽम्बुजाहतः ॥ ७० ॥

विशेषविदुरसमाः पदाश्रितान्
अभीप्सितान्यपि च जनान् यथोचितम् ।
क्रियोक्तकानि विनुमोद दक्षयं
जनं स्वितं परिवृतमन्ति वाक्पतः ॥ ७१ ॥

निरीक्षमाणमपिनैकमूर्तपि-
तनुपानक्षमपथ कोटिकाशनम् ।

अनुष्ठितैरविकलमन्यदुश्चरै-
स्शुभव्रतैरधिकविशुद्धतां दधौ ॥ ७२ ॥

अथाद्दतैरनशनजागरादिभिः
कृशांगमप्यविकलधीरधीगुणम् ।
अवेक्ष्य ये नृपमनमन्नमीभिर-
प्यवाप्यताधिकशुचितोदितादृतैः ॥ ७३ ॥

त्रयीश्वरं पुनरयमेत्य भक्तित-
स्समर्च्य तं वसु बहु तत्पदेर्पयन् ।
महोत्सवं कमपि पुरेऽत्र नूतनं
प्रवर्तयन् मनसि कृतार्थतामधात् ॥ ७४ ॥

राय विरहाकुलां कनकशैलसौधश्रियं
स लाळयितुमुत्सुकस्तदनु सादरं निर्ययौ ।
असावपि विलासतः पवनलोलवल्लीमिषात्
प्रसारितकरेव तं द्रुतमवाञ्छदालिंगितुम् ॥ ७५ ॥

आसाद्य प्रतिनवभूरिभूतिरम्यं
सांम्यं तन्मुदितकळत्रपुत्रमित्रम् ।
हेमाद्रेरुपरि स विष्फुरन् पुराग्र्यं
तेजस्वी भुव इव दीपतामतानीत् ॥ ७६ ॥

कृत्यान्यालोच्य कुर्वन्ननुदिनमुचिता-
न्यर्चयन् विष्टपेशं
मित्राण्यादृत्य पश्यन् मुहुरपि करुणा-
लोकमार्तेषु तन्वन् ।
अत्याचारान् स धुन्वन्नपदयमुचिता-
चारनिष्ठांश्च धिन्व-
न्नत्रावात्सीदमात्योदितमहितनयान्
मानयन् मानवेन्द्रः ॥ ७७ ॥

इति श्रीरामवर्मविजये नव्यकाव्ये
सम्राड्समागमो नाम अष्टमस्सर्गः

॥ समाप्तः ॥

॥ नवमः सर्गः ॥

विस्मयाय जगतां जनेशितु-
स्तस्य कोऽपि महिमा व्यजृंभत ।
यत् [1] सदापि सकलैस्सुदुर्लभां
भूतिमावहति मादृशो जनः ॥ १ ॥

विद्ययात्र बहुधोन्नतिं गता
नित्यमाकलितनिस्तुलोद्यमाः ।
स्तुल्यतां दधति येऽभियन्ति ते
सत्यमेव परितोष्यमसंख्यताम् [2] ॥ २ ॥

बालका इव च बालिकाः पृथक्
पाठमन्दिरवरेष्वपाठत ।

---

[१] यस्मात् कारणात् । [२] तेषां संख्या न केनापि गणयितुं शक्येत्यर्थः ।

आमरीमपि च कैरळीं गिरं
  शृणवाद्यमनुसृत्य सर्वतः ॥ ३ ॥

नामतोऽप्यवरतां गताः स्त्रियो
  ज्ञानतोऽतिवरतामुपागताः ।
आनता अपि तनुष्वपोषय-
  न्मानतो मुहुरनेकधोन्नतिम् ॥ ४ ॥

अप्यहो शिशुजनोदिताधिकं
  शुद्धिमाप सरसा सरस्वती ।
विज्ञतास्ति मिथुनस्य चेन्न किं
  तद्गुणः स्पृशति तत्प्रजास्स्वयम् ॥ ५ ॥

राजनीतिगणितागमावनी-
  संविभागचरितादिबोधतः ।
इद्धयौवनदशाश्च मानुषा
  वृद्धभावमगमन्निहावनौ ॥ ६ ॥

बालिकापठनमन्दिरेष्वगात्
  पाठने विषयतां विशेषतः ।

---

[१] ज्ञानवृद्धत्वम् ।

गानरीतिरुचिता यतोऽबलाः
पाटवं निखिलमोहनं दधुः ॥ ७ ॥

साहितीसहितगीतिरूपकं
भारतीकुचयुगं दिने दिने ।
भाटभूरखयत्रासिनां सदा-
स्वादनीयरसतामुपाययौ ॥ ८ ॥

सूरयस्तुद्दडपाठनोद्यमा
बालकाश्च पठनैकलालसाः ।
भाटभूतल इवान्यतस्तु ने-
त्यूहकौतुकमथोज्जगुर्ज्जनाः ॥ ९ ॥

त्रिधर्यैवमनवद्यया ततः
सद्य एव जनिताश्च सद्गुणाः ।
सज्जनस्य कुतुकं पदे पदे
सज्जमत्यकलयन्ननुत्तमाः ॥ १० ॥

केरळीयवनिता तु केवलं
केळिभूविटजनस्य नैकधा ।

---

[१] एभ्यः परं उत्तमा न विद्यन्त इति सकलोत्तमाः ।

इत्यकीर्तिमलिनाखिरोदितां
स्तुत्य एष नयशिक्षणक्रमः ॥ ११ ॥

कामिनीजनमुखावलिः पुनः
क्ष्मातलेऽम्बुजतुलामलं दधौ ।
अन्यपूरुषमुखेन्दुदर्शने
सन्निमीलनमवाप यत् स्वयम् ॥ १२ ॥

भूसुराश्च परितो निजोचिता-
चारपालनपरा विरेजिरे ।
आसुरीं[१] यदिह वृत्तिमेष न
क्षोणिपोऽसहत कश्मलाग्निवत् ॥ १३ ॥

सत्कृतिं स्वयमसत्कृतिं नृप-
स्सद्य एव सकलां विलोकयन् ।
दृष्टिरस्य खलु तादृशी व्रते-
त्यौज्झदुष्कृतिरतिः खलैरपि ॥ १४ ॥

नन्द्यमत्र ननु निन्द्यमेव वा
कर्मयद्यदतनोद्यदातु यः ।

---

[१] निकृष्टां असुरसंबन्धिनीं च ।

येन तत्तदुचितं फलं तदै-
वान्वभूयत नृपोपकल्पितम् ॥ १५ ॥

दण्डितोऽपि नृवराज्ञयेति तं
दण्डमस्तविशयं जनोऽग्रहीत् ।
सूनवो हि जनकस्य पाणिना
ताडनेऽपि विमतिं न तन्वते ॥ १६ ॥

सन्तु वात्र शतशोधिकारिणः
किन्तु नीतिनिपुणो नृपाशयः ।
लेशतोऽपि न विभिद्यते क्वचित्
केन वापि नियमाध्वगामिना ॥ १७ ॥

केषुचिज्जनपदेषु सत्प्रभून्
दूषयन्ति खलु सेवकाः खलाः ।
हा बतैभिरदयं मुहुर्जनः
पीड्यते च विवशीकृतेश्वरैः ॥ १८ ॥

अस्य तु प्रकटतेजसः प्रभो-
स्सेवका यदि सदोपमानसाः ।

---

[१] लालने ह्यनुमतिं कुर्वन्त्येव ।

तं भजन्त्यचिरतोऽपदोषतां
स्वामिसच्चरितसक्तचेतसः ॥ १९ ॥

दारसूनुसचिवादियोगतो
निन्द्यतां दधति केचिदीश्वराः ।
योगतोऽस्य तु समेऽनुगास्स्वयं
मन्यतां दधति सर्वतस्सताम् ॥ २० ॥

द्यूतकेलिमृगयाद्यधूरसैः
प्रायशो विपदि कृष्यते नृपः ।
धीर एष तु वशीचकार ता-
नीदृशं जगति कर्षतीह कः ॥ २१ ॥

प्रायशः क्षितिपदर्शनं सदा
दुर्लभं खलु महात्मनामपि ।
अत्र पार्थिवदिदृक्षयैत्य कः
प्रत्यगात् स्वयमलब्धवाञ्छितः ॥ २२ ॥

केचन क्षितिभुजो हि मन्त्रिषु
न्यस्तभूतलभरा उदासते ।
स्तुत्यमन्त्रिवरसंहितस्स्वयं
कृत्यजातमतनोदतन्द्रितः ॥ २३ ॥

स्वेच्छयैव निजकार्यमन्तिके
निर्धनैरिव धनाधिकैरपि ।
नित्यमेत्य विनिवेद्यते यतः
तित्यर्थीश इह सर्वतस्समः ॥ २४ ॥

आवितात्तुवचसोऽमुनादरात्
ग्राह्यमेव हि विविच्य गृह्यते ।
किन्तु दुग्धजलयोर्विवेचने
मन्दता भजति राजहंसकम् ॥ २५ ॥

पक्षपात इह भूभुजां सुहृत्-
स्नेहतो भवति दूषणं च तत् ।
अस्य चान्वहमुदेति स स्फुटं
सद्गुणैकमनसस्तु भूषणम् ॥ २६ ॥

अन्यदेव सकलं महीपते-
रस्य भूभरणनीतिनैपुणम् ।

---

[१] हंसविशेषं राजश्रेष्ठं च । [२] गुणेष्वेवास्य पक्षपात इति भावः ।

अन्यराज्यपदसेविभिर्जनै-
रन्ववैक्ष्यत मुदाऽतिविस्मितैः ॥ २७॥

अस्य रक्षणविधेः पुरोक्षिता
मातृभूमिरियमत्र पश्यताम् ।
देहिनां सपदि केयमित्यदात्
कामपि प्रकटकौतुकां मतिम् ॥ २८ ॥

पाठमन्दिरवराण्यनेकधा
नूतनानि परितः पदे पदे ।
आबभुर्जनविबोधमादधु-
र्यानि जातिमतभेदमन्तरा ॥ २९ ॥

पुस्तकाकलितहस्तपल्लवाः
सुप्रभांबराशिरस्त्रकञ्चुकाः ।
बालकाः पठनमन्दिरोन्मुखा-
स्तत्र तत्र मुदमादधुस्सताम् ॥ ३० ॥

यौवनोदयविलासपेशला
अप्यधीतिनिरताश्शुभांबराः ।

---

[१] अस्मिन् समये ।

पोषितश्च सुभगास्सपुस्तकाः
पश्यतां पथिषु कौतुकं ददुः ॥ ३१ ॥

धर्मवैश्मनिलयास्तु गालानां
निर्मिताश्च बहुधा विरेजिरे ।
मर्मविद्धजनतोऽप्यवाप्य यान्
शर्म सिद्धमिति मन्वते जनाः ॥ ३२ ॥

चन्दनाधिकृतमन्दिराणि स
च्चित्रशिल्पसुभगानि कुत्रचित् ।
नव्यभव्यसुषमाश्रितान्यहु-
स्तत्रविलोकनगुणान्युपेयुषाम् ॥ ३३ ॥

जीर्णतोद्धृतिविसृत्वरश्रियः
क्षेत्रमुख्यनिलयास्तनलसः ।
आश्रितेष्टफलदानविश्रुताः
काश्यपीवलयमन्दभूषणम् ॥ ३४ ॥

स्वैरमत्र समयानुरोधतः
स्मश्रुरन्तमनला[illegible] ।

[१] शिशिरैश्चान्नतो [illegible]

सत्वरैककरलग्नमेत्य भूपते-
र्वीक्ष्य सन्तुष्टुपगताः परम् ॥ ३५ ॥

मारुताहतपयोदवज्जवा-
द्राजमार्गपतितेषु गच्छतः ।
सञ्चरत् किमपि यानरत्नकं
वीक्षणं च सकलैर्विलोकितम् ॥ ३६ ॥

दूरतोऽपि खलु वाञ्छकाः जना
नीयमानमनुयान्ति स्म तम् ।
घूर्णिकासु सकलाश्च दुर्लभा-
व्याकुलेषु विपणेष्वहर्निशम् ॥ ३७ ॥

सौरभ्यस्वविसरोदयाश्रिता-
स्तीर्थयोगसुभगा गुणोज्ज्वलाः ।
दीपिकाश्च विविधास्ततस्तता
राजकीर्तिवदिति प्रकाशिरे ॥ ३८ ॥

---

[१] Motor Car. [२] गुणाधिकसत्त्वादिजन्तुसम्पन्नाः सारभूतसत्त्वगुणविशेषश्लाघ्याश्च । [३] जलाशयसंयोगरम्याः सामान्यगुणप्रयोगमहिताश्च । [४] शुचित्वपवित्रतासहिताः स्नेहयुक्ताश्च ।

यत्र यत्र गतमत्र भूतले
तत्र तत्र च विचित्रसत्फलम् ।
मर्त्यनाथमतिनैपुणं बुधै-
र्नित्यमैक्ष्यत समस्तवस्तुषु ॥ ३९ ॥

विश्वविश्वासवनं सुहृदिह-
त्याग्नितुल्यमहसि क्षितीश्वरे ।
शश्वदेनमनुसृत्य मन्त्रिणा
शिश्रियेऽत्र पवनस्य पृष्ठनयम् ॥ ४० ॥

धीरता च करुणा रमाद्रता
शूरता चतुरता च कर्मसु ।
श्रीरता च मतिरुल्ललास हि
स्वामिनीव सचिवप्रतारतम् ॥ ४१ ॥

अस्ति नूनमनुरूपता गुणै-
रत्र मन्त्रिणि महीपतेरिति ।
विस्तृतोरुकुशलोद्यमैर्जनै-
र्नित्यमाप्यत नृपानुमोदनम् ॥ ४२ ॥

मोऽटतीह परितस्सदेत्यसौ
मातृभूमिरुचितार्थसंज्ञनाम् ।

---

[१] लक्ष्मीः संचरति ।

आदृढं समवति क्षितीश्वरे
रामवर्मणि सुमन्त्रिसेविते ॥ ४३ ॥

क्षित्यधीशमतकृत्यमादृता-
न्नित्यमाचरति मर्त्यमण्डले ।
नापदो हि विपदोऽत्र धार्मिकान्
भूपतेरिव भयादुपासरन् ॥ ४४ ॥

नीतिषु प्रविसृतासु नूतना-
स्त्वीतयः क्षितिमिमां न पस्पृशुः ।
भूतयः परमुपर्युपर्यति-
प्रीतयश्च सुजनेऽदधुः पदम् ॥ ४५ ॥

निस्स्वता नियतमस्य भूतला-
न्निस्सृता यदपि दुर्नीतिक्षमास्पदा ।
यत्समृद्ध्युचितकर्मतत्परो
दृश्यते स्म खलु सर्वतो जनः ॥ ४६ ॥

शल्यतां भुवि चिरं वहन् समं-
गल्यता कलिरिहापि भूतले ।

---

[१] अतिवृष्ट्यादिदोषाः । [२] अत्र स्थलमलभ्य
यत्रकुत्रापि निर्गतेत्यर्थः ।

कल्यशीलगुणभूपयोगतः
  कैल्यतां हि भजते खलोऽप्यलम् ॥ ४७ ॥

उन्नताधिकृतिरन्यदेशजे
  सन्निधीयत इतीह निश्चयः ।
अन्यथाऽशु विहितः पदेत्र ख-
  ल्वन्वहं यदुदितास्सुपाण्डिताः ॥ ४८ ॥

वैद्यकर्मणि वनावनक्रमे
  विश्रुतासु नयपद्धतिष्वपि ।
भूरिशः पृथगधीतिनः परं
  पूरिताशमिह भूपतिं व्यधुः ॥ ४९ ॥

उच्चयांगलपरीक्षयाऽभितो
  हृद्यया च विनयाश्रियात्र कः ।
स्तुत्यतां न गमितोस्य भूपते-
  र्भृत्यतामुपगतेषु सूरिषु ॥ ५० ॥

---

[१] श्लाध्यत्वं "राजा कालस्य कारणं" इति कालनियामकत्वं राज्ञ एवेत्याशयमनुसृत्येयमुक्तिः ।

स्वप्रजाभिरहसत्फलोद्यमान्
वीक्ष्य भूपतिरनन्ददुच्चकैः ।
आत्मसौख्यफलकान् नृपोद्यमां-
स्ताः प्रजाश्च तुतुषुर्विलोक्य तान् ॥ ५१ ॥

यादृशीं प्रकृतिवत्सलो नृपः
प्रीतिमासु जनतास्वदीदृशत् ।
तादृशीमनुदिनं जनास्स्वयं
स्वामिभक्तिमपि नन्वदीदृशन् ॥ ५२ ॥

सत्प्रिये नरवरे च ये गुणाः
सत्प्रजासु च पुराणतश्श्रुताः ।
तेऽखिलास्सपदि मातृभूतले
लोकदर्शनपदं जगाहिरे ॥ ५३ ॥

रामचन्द्रनळधर्मजन्मनां
रामवर्मणि न साम्यसंशयः ।
प्रेयसीवचनमत्तकेळिम-
प्येष नाद्रियत यत् कदाप्यलम् ॥ ५४ ॥

कार्तवीर्य इव कीर्तनीयता
पार्थिवेऽत्र परमर्जुनप्रथे ।

---

[१] धवळयशसि अर्जुनाख्याप्रसिद्धे च ।

यद्यपि द्विजकुलोत्तमस्य मां
नैष कर्षति ददात्यपि स्वयम् ॥ ५५ ॥

सुस्थितः कनकशैलमन्दिरे
दृष्टिपातमभितः प्रवर्तयन् ।
अप्यमुष्य तुलनां हरिः कथं
गोत्राभिद्व्रजति गोत्रपोषिणः ॥ ५६ ॥

पूर्ववन्निजकुटुंबलालिने
पूर्णवेदनिलयेशसेविने ।
पूरुषेन्द्रमणये स्म रोचते
पूर्णगेहवसतिश्च भूभुजे ॥ ५७ ॥

कार्ययोगवशतोऽन्तरान्तरा
स्वीयमूलपुरमेत्य वंशजान् ।
आदरेण परितोषयन् मुदा
मेदुरेण मनसात्र चावसत् ॥ ५८ ॥

---

[१] पर्वतभेदी । [२] वंशवर्द्धनस्य ।

नित्यमेत्य निगमेशमस्म्यहं
भृत्य इत्यनुभजन् पदाङ्कणम् ।
स्तुत्यकीर्तिरधिनोन्निजं कुलं
कृत्यमत्युचितमाचरन् सताम् ॥ ५९ ॥

नन्दनं मनसि तं वयोधिको
नन्वमन्यत महीश्वरीजनः ।
तत्पदोपचरणेन यत् स्वयं
धन्य इत्यवनिपोऽतनोन्मतिम् ॥ ६० ॥

पुण्यदर्शनमनन्तरोद्भवाः
पण्डितं गुरुमधीतितत्पराः ।
मन्वते स्म सुहृदं सुधीजना-
स्तं नरेन्द्रमखिलार्थ्यवैभवम् ॥ ६१ ॥

नर्मसख्यमकरोत् सुहृज्जने-
ष्विष्टदत्वमतनोदिहार्थिषु ।
आश्रितेषु परमीश्वरत्वम-
प्यैत्ति कस्य कुशलायनं न सः ॥ ६२ ॥

स्वीयवंशतरुणीषु संस्कृत-
स्यैव पूर्वमभवत् प्रचारणम् ।
नैव युक्तमिदमित्ययं दधौ
तास्वथाङ्गलगिरां च शिक्षणम् ॥ ६३ ॥

कालमेतमनुसृत्य कन्यका-
स्ताश्च राजकुलजास्ततोऽपठन् ।
आदितेयगिरमादितस्तथे-
वांगलेयगिरमप्यनिन्दिताम् ॥ ६४ ॥

ज्ञानतोपि वयसा च वृद्धता-
मागतान् द्विजगुरूनवाप्य ताः[२] ।
भूपतेर्मतमवेत्य नूतनां
पाठरीतिमपि गाढमादद्रुः ॥ ६५ ॥

एवमत्र महिते नृपान्वये
देवगीरिव सुरोपगीरपि ।
आस्पदानि क्षितीश्वरीः
प्राविशन् प्रतिनया विभूतयः ॥ ६६ ॥

---

[१] आंग्लभाषाध्ययनं च राजकुमारीष्वादिष्टवानित्यर्थः ।
[२] तासामध्यापने हि वयोधिकविप्राणामेव गुरुत्वं योग्यम् ।
[३] इतीत्यत्र हेत्वर्थे ।

स्त्रीकुलेष्वतुलमं वचस्यभूत्
पाटवं किमपि सौभगं तनौ ।
भावतश्च मधुरत्वमित्यतो-
यावहन् कुतुकमास्वदो बुधाः ॥ ६७ ॥

राजमान्यकुलयोषितः क्रमात्
आगमान्नवबोधसम्पदः ।
भाविकालकुशलाय हि स्युरि-
त्याकलय्य मुमुदे महाजनः ॥ ६८ ॥

विद्यया हि विजयोऽखिलात्मनो-
स्तानुजन्मभगिनीसुतेष्वपि ।
आप्यते स्म बहुधाऽद्य एवनो
कुर्वते च कुशलं नयोद्यमैः ॥ ६९ ॥

आहतो हि भगिनीसुतोऽस्य को-
प्याकुलान् विषभयाद्विशेषतः ।

---

[१] एवमासां परिष्कारोदयादेतत्कुमाराणामिदानीन्तनापेक्षयापि गुणोत्कर्षः संभावनीयः खलु । [२] एतदग्रजायाः कांञ्चिकावाख्यराज्ञ्याः प्रथमपुत्रत्वादनितरसाधारणप्रतिभाशालित्वाच्चास्मिन्नादरविशेषः । [३] विषचिकित्सायां विविधकलास्वप्यस्य पाटवमनिर्वचनीयम् ।

पालयन्निह नरेन्द्रतां द्विधा
ध्यातनोति सुकृती सनामकः ॥ ७० ॥

सूनुरस्य च सुधीरधीतित-
स्स्वैरमांगलगिरं विशेषतः ।
शैशवेपि विजयी वशेऽकरो-
दीदृशामसुकरं नहीक्ष्यते ॥ ७१ ॥

सुश्रियोस्य तनये च हृद्यया
विद्ययाऽपि विनयश्रियाश्रिते ।
कस्य नात्र सुधियः कुतूहलं
विस्मयं च तनुतस्सदादृते ॥ ७२ ॥

सनामकः कश्चन भागिनेयः
क्षमापतेरस्य परीक्षयागात् ।
कलागुरुत्वं विरुदं किलैत-
न्नृपालदौर्यैनवाप्तपूर्वम् ॥ ७३ ॥

---

[१] कैरल्यां कोच्चुण्ण्याख्यया सुप्रसिद्धस्याप्यस्य विधि-
र्पितं नामधेयं रामवर्मेत्येव । [२] एं. ए. परीक्षामुत्तीर्णवा-
नित्यर्थः । [३] एतत्परीक्षोत्तीर्णेषु राजकुमारेष्वयमेवादिम
इति भावः।

पश्यन्नेवं विशेषात् कुशलमनुदिनं
भूतलेऽप्यन्वयेऽस्मिन्
पुष्यन्मानाविलासं प्रतिनवमहिमो-
ल्लासनिर्लूनदोषम् ।
शश्वत् संस्तूयमानस्सकलकविकुलै-
स्साधुसम्प्रीतियोगा-
त्तुष्यद्भिः क्षोणिपालस्स हि सचिवमणि-
प्रीणितोऽरक्षदुर्वीम् ॥ ७४ ॥

इति श्रीरामवर्मविजये नव्यकाव्ये
विविधकुशलोल्लासो नाम नवमस्सर्गः
॥ समाप्तः ॥

॥ दशमः सर्गः ॥

अवनिमेवमवत्यवनीश्वरे
  विनयशालिनि सत्सचिवान्विते ।
जनपदावलिरत्र तु नाकता-
  मुपगतापगताखिलदुःस्थितिः ॥ १ ॥

भरतभूमिरशेषजनादृता
  भृगुजभूरियमत्र विशेषतः ।
इह च मातृमहीति निशम्य सा-
  दरमिता रमिताश्च सुदूरगाः ॥ २ ॥

क्वचन धूमरथागमनोद्यतः
  क्षितिपरिष्कृतिसञ्जनितः क्वचित् ।
नृवरमार वनावनजोन्यतो
  धनचयो न च योऽर्हति गण्यताम् ॥ ३ ॥

(1) Setlement.

पठनपाठनपाटवशालिभि-
र्विविधबालकपाठकसज्जनैः ।
शुशुभिरे परितः पठनालयाः
क्षितिभृतानिभृतादरपोषिताः ॥ ४ ॥

नृपतिशासनतो भुवि पत्रिका-
वहनकृत्यरतै[1]रधिकारिभिः ।
अधिकदूरमनागपि धनादिर-
प्यरमितोऽ[2]पि नात्र जनेषु कः ॥ ५ ॥

विपुलशैलवनोदरतः क्वचित्
प्रगुणदारुचयान् समुपानयन् ।
शकटराडतनोदनलार्चिषा
विचलितोऽचलितोच्चपदां श्रियम् ॥ ६ ॥

तत इतो बत [3]जन्ममहीश्वरैः
प्रभुभिरत्र चिराय विमर्दिताः ।
नरपतिर्जनता बहुधाधिनो-
न्नियमतोयमतोर्थ्ययशा बभौ ॥ ७ ॥

---

[1] Officers of Anchel department. [2] सर्वेऽपि जना रमित एवाभूदित्याशयः । [3] Land lords.

निजभुवोऽपि यथेच्छमितस्ततो
   वितरणे, निपुणेष्वथ जन्मिषु ।
मदविदूषितहृत्स्वपि तेष्वभूत्
   सुजनता जनतापहरी क्रमात् ॥ ८ ॥

द्रविणलक्षशतौघचयव्ययैः
   क्वचन साध्यतयात्र विनिश्चिते ।
जलधिपोतपथेऽप्ययमुद्यमं
   व्यतनुतातनुताण्डवभूरिश्रयः ॥ ९ ॥

यदि स माटमहीशमडापुरीं
   जलधिपोतपथस्समुपागतः ।
अळकया किमतः परमुल्लस-
   द्विभवया भवयाच्यशुभाश्रिया ॥ १० ॥

भरणतोऽस्य यशस्विनि वत्सरे
   सपदि सप्तदशेथ विनिर्गते ।
वयसि षष्ठितमे नृपतिर्मुदा
पदमदादमदार्तिनिषूदनः ॥ ११ ॥

   सुचिरमत्र कुले नृवराः पुरा
न खलु पस्पृशुरर्थ्यमिदं वयः ।

---

(1) Harbour.

इह नृपेस्य तु पूर्तिरिति स्फुटं
धृतरसा तरसा जनतोज्जगौ ॥ १२ ॥

तत इतो मिळितेषु सदस्सु किं
शुभमपूर्व इहेश्वरजन्मभे ।
तनुम इत्यसकृत् सुधियस्ससं-
मदममंदममंसत संगताः ॥ १३ ॥

अवनिभृज्जननर्क्षशुभोदये
विविधवित्तचयव्यय उत्सवः ।
अभवदत्र नृणां यदितः कृता
क्षितिरनीतिरनीतिजनोज्झिता ॥ १४ ॥

कतिचिदर्थिजनौदनदापनं
दिशि दिशि क्षितिवल्लभजन्मभे ।
विधिवदत्र विधेयमिति स्फुटं
निजगदुर्जगदुज्ज्वलसद्गुणाः ॥ १५ ॥

सकलदेवकुलार्चनसत्क्रियाः
परित एव तदात्र महीतले ।

वितनुमो वयमित्यवदन् जगत्-
   कुशलकौशलकौतुकिनोऽपरे ॥ १६ ॥

भुवि महोपि नृपोपि बतेदृशो
   दृढमपूर्व इति स्मृतयेऽस्य तु ।
प्रतिकृतिः प्रगुणात्र निधीयता-
   मिति परेऽतिपरेण हृदाऽब्रुवन् ॥ १७ ॥

विविधमेवमुपाहितनिश्चयै-
   रधिकृतैः प्रभुभिश्च महाजनैः ।
प्रकटिताजनि राज्ञि कृतज्ञता
   सुकृति सा कृतिसार्थनमस्कृते ॥ १८ ॥

जनपदेष्विति निस्तुलमुद्यमं
   नृपशुभार्थिजनौघ इहातनोत् ।
जनपतिश्च धनेश इवातनो-
   द्व्ययमतिं यमतीन्द्रमुशन्त्यतः ॥ १९ ॥

कनकरूप्यकरत्नविवर्षणं
   नरवरांवुधरेऽत्र चिकीर्षति ।

---

[१] इतरवस्तुचिन्तारहितेन । [२] शुभकर्मकारिणि ।

[१]कुलवरभावमगुर्धवातका-
नवरसा वरसारगिरस्स्वयम् ॥ २० ॥

बहुशुभेऽथ महे भरताग्रने-
र्न परमत्र कुतूहलशालिनी ।
वत धुरोपधरित्र्यपि भूमिप-
स्स इह तदाहतदानलसद्यशाः ॥ २१ ॥

सचिवपुंगवशासनतोथ पु-
र्यवनिखण्डशताधिकृतानुगैः ।
सह समाहितचित्तमुपेत्य स-
न्यदधतादधतापि महोद्यमान् ॥ २२ ॥

द्विजमणींश्च बुधान् नृपतीनिहा-
जिगमिषून् समवेक्ष्य परिष्कृतैः ।
नवगृहैस्समभूष्यत सत्प्रभा-
विहसितैर्हसितेन्द्रपदैः पुरी ॥ २३ ॥

तत इतश्च महार्हपदार्थसं-
भृतमहासदनोद्यतपूरुषा ।

---

[१] आंगलभूमिः ।

सपदि सा तु पुरी कुतुकं मन-
स्यदित मोदितमोहितवीक्षका ॥ २४ ॥

परिनिपीय नृपस्तंकथासुधां
श्रुतिसुखां विबुधा विधुताधयः ।
तत इतोत्र हृतास्तरसाऽमिळ-
न्नवनिपार्वानिगावनसद्गुणैः ॥ २५ ॥

क्षितिसुराढ्यवरैर्विविधैर्द्विजैः
प्रभुजनैरपि पूर्णपदाङ्कितम् ।
पुरमपूर्यत पुण्ययशःश्रिया
प्रतिभयाऽतिभया च विभूषितैः ॥ २६ ॥

प्रणयपात्रिकया कतिचित् परे
निपुणदूतमुखेन च सन्निधिम् ।
तनुभिरेव च केऽपि नृपा व्यधु-
स्सरसस्मार सवाकुलता जनः ॥ २७ ॥

तदनु केचिदितो धनलिप्सया
कतिचिदस्य महस्य दिदृक्षया ।

[१] प्राप ।

अथ परे तु पुरेऽत्र बुभुत्सया
ससमगं समगंसत सर्वतः ॥ २८ ॥

धनुषि मासि चलत्यथ वत्सरे
पुनरशीतितमेऽप्ययुतेऽत्र सः ।
पुरहरर्क्षमहः किमवेत्य स-
न्नृवरभं वरभं तदुपासदत् ॥ २९ ॥

उषसि यत्र महे शिशिरातुरा-
न्नपि वरान् शयनेषु विहाय हा ।
परिरमन्ति जलेष्वबलाः कुचैः
कमलकोमळकोरकसप्रभैः ॥ ३० ॥

सलिलताडनगानकळस्वनै-
स्समपादि तान् सुखयन्ति वियोगिनः ।
अपि वधूमणयश्श्रवणोचिता
नवसुधा वसुधासु विकीर्य ताः ॥ ३१ ॥

दिनमुखे विहिताभिषवाश्शिवा-
र्चनरता ललनाश्शुभदर्शनाः ।

---

[१] आर्द्रामहोत्सवः प्रत्यब्दं धनुषि केरळेष्वेवाद्रियमाणः तत्प्रकारमत्रातः परमष्टाभिः श्लोकैर्विवृणोति ।

अहनि चानशनव्रतकर्शिता-
स्समयमामयमान्यमृतेऽनयन ॥ ३२ ॥

युवतयोत्र समेत्य मुहुश्चलत्-
कुचनितंबभरावनतांगकाः ।
विसृतगीतसुधाः परितोष्य तं
भुवि हरं विहरन्ति परं स्म ताः ॥ ३३ ॥

करविघट्टनगानरसाश्रितै-
र्विलसितैरिह नृत्यकलाविधौ ।
युवमनांस्यहरद्युवतीततेः
कळकलोळकलोलमुखश्रियः ॥ ३४ ॥ ४२ ॥

नियमनर्तनगानरसालसाः
फलकुलैश्च पयोभिरुपास्य ताः ।
प्रणयिता परमत्र महे दिनै-
स्त्रिचतुरैश्चतुरैः प्रकटीकृता ॥ ३५ ॥

इह महे निशि केळिरतात्मनां
मृगदृशां किमु खेदजिहीर्षया ।
अविकला हि कला न सुधारुचो
रुरुचिरे रुचिरेण न रोचिषा ॥ ३६ ॥

---

[१] अत्यन्तं रुरुचिरे ।

सपदि चन्द्रिकया विशदीकृते
   सकल एव महीतलमण्डले ।
सुकृतिनो व्यहरन् विगळत्कळा-
   न्तरवधूरवधूतमनोव्यथाः ॥ ३७ ॥

हरकृपर्क्षमहामहयोस्तयोः
   पुरत एव पुरेव पुरोहितैः ।
समचलन् विहिता दुरितावली-
   दरणदा रणदाक्ष्यजुषः क्रियाः ॥ ३८ ॥

हरशुभर्क्षनिशाहितजागरै-
   रिह महे स्म रसात् प्रतिपाल्यते ।
सकुतुकै रमणीरमणैः पुन-
   र्वसुदिनं सुदिनं भुवनस्य तत् ॥ ३९ ॥

अथ समाविरभूद्दशमाद्दिनात्
   परमरं तदुषोत्र हि मासि यत् ।
समतनोद्द्विविधानि शुभानि स-
   च्चरितपूरितपूर्णपुरोदरे ॥ ४० ॥

---

[१] पापविनाशने पापविनाशकमनोनैर्मल्योत्पादने च समर्था इत्यर्थः ।

महितमर्दळशंखशुभस्वनो
नळिकानिर्गतनिस्स्वनमूर्च्छितः ।
प्रविसृतस्स पुरेत्र शनैस्सुर-
भ्युपवने पवनेन च वीजितम् ॥ ४१ ॥

कुसुमकोरकभेदनलम्पटो
विट इवैष विलासिजनप्रियः ।
मरुदसावि जडोप्यखिलैर्धृतिं
विकलयन् कलयन् बहुसीत्कृतिम् ॥ ४२ ॥

नरवरस्त्वदिनोदयकौतुकात्
किमिव पक्षिकुलैः परितस्स्वयम् ।
विधुनयान्धमसानि कळस्वनै-
रविकलं विकलं च विधोर्महः ॥ ४३ ॥

तदनु वन्दिन एत्य यथोचितं
मधुरमधुरं तमबोधयन् ।
स्तुतिवचोभिररिश्रवणामृतात्-
किमपदैरपदैरन्यपदाश्रितम् ॥ ४४ ॥

नयनिधे अय रात्रिरियं गता
नयनमुन्मिषतु श्रयतु श्रियम् ।
शयनमत्र हि नाथ निषिध्यते
सुकृतिभिः कृतिभिन्नमनोमलैः ॥ ४५ ॥

जयति देव यशस्तव येन सं-
निहतनैपुण एष निशाकरः ।
वहति सम्प्रति हन्त विवर्णतां
जगति कोऽगतिको न जडात्मसु ॥ ४६ ॥

अवसरेत्र नरेश्वर वज्रिणो-
दिशि सरागमुदेति मुदे नृणाम् ।
दिनकरोदयशंसि शनैश्शनैः
किमपि धाम पिधानहरं दृशाम् ॥ ४७ ॥

विलयमेत्यधुना द्विजराडतः
कुमुदमेति तनुत्वमनुक्षणम् ।

---

[१] मूढधियस्सर्वेपि क्रमेणाशरणा एव भवन्तीति भावः ।
[२] कुमुदस्य निष्प्रभत्वं भूलोकसन्तोषस्य विरळत्वं च लक्ष्येते इत्यर्थः द्विजराड्विलयजनितमसुखं द्विजकुलेशस्य हि विलोधात्त्वद्वयेदेवेत्यवधेयम् ।

द्विजकुलेश तवाशु विरोधत-
स्सुलभतां लभतां सुखमाशु तत् ॥ ४८ ॥

विरळदर्शनतारकमंबरं
मलिनदीपकुलं च महीतलम् ।
उभयमप्यधुनाऽप्रभराजकं
समतया मतया वत लक्ष्यते ॥ ४९ ॥

तदिह तत्परसं जहिहि क्षणा-
दुदितराजकतां भजतां क्षितिः ।
वचनमेतदसाध्वपि सत्सुधी-
जननुताननुतापदमस्तु नः ॥ ५० ॥

सरसविनयमेवं वन्दिनां वाग्विलासं
नरपतिरुपशृण्वन्नर्थ्यमुत्थाय शीघ्रम् ।
दिनमुखकरणीयं कृत्यमादृत्य सम्यक्
जनिदिवसविधेयं कर्तुमभ्युद्यतोभूत् ॥ ५१ ॥

सत्पात्रेषु श्रीविशेषार्पणोत्कं
पृथ्वीशं तं वीक्ष्य किं कर्मसाक्षी ।

---

[१] चन्द्रो नृपश्च । [२] कविप्रार्थनाप्यत्र व्यज्यते ।

भिन्दन् भिन्दन् दुस्तमस्तत् समस्तं
प्रत्यक्षोभूत् स्वं करं सम्प्रसार्य ॥ ५२ ॥

अथाखिलोर्वीतलवासिलोचनै-
र्निपीयमानागरुचिर्नरेश्वरः ।
पुरश्चरैश्चानुचरैस्समावृत-
स्त्र्यधीशसेवार्थमगात्तदालयम् ॥ ५३ ॥

अखिलसुखदे राजन्यायाति विष्णुपदाङ्कणं
कुवलयरसोल्लासः कोवाप्यभूदिति नाद्भुतत् ।
तदिह कमलोन्मेषानन्दिद्विजावलिनन्दिते
शुभतमदिनारंभे वृत्तं हि चित्रमिदं नकिम् ॥ ५४ ॥

हरेः पुरस्तत्र तुलाधिरूढं
जिगाय तं सत्कदळीफलानाम् ।
चयस्सुवर्णाद्रिनिभो गरिम्णा
वपुश्श्रिया सोप्युपदीकृतं तम् ॥ ५५ ॥

---

[१] कुमुदरसोन्मेषो दिनारंभ इति विरोधः भूवलयरसोल्लास इति परिहारश्च ।

सस्नेहं विविधविशेषरत्नजातं
पादाब्जे भुवनपतेस्त्रयीश्वरस्य ।
पृथ्वीशः स्फुटमुपहृत्य कृत्यवेदी
नत्वा तं स्वमपि समार्पयत् सुभक्तः ॥ ५६ ॥

तदनु सदनं गत्वा दानक्रियानिरते नृपे
कनकनिचयः कर्ता क्षेमोदयस्य हि सर्वतः ।
जगति कुशलायागात् कर्मत्वमित्यनृणोन्नृणा-
मधिकरणतामाधेयत्वं विहाय कुतूहलम् ॥ ५७ ॥

वित्तौघे विविधात्मकेऽवनिभृता
भूमण्डले गोकुले
ब्रह्माण्डेपि तदाशु वीक्ष्य विधिव-
द्विश्राणितेषु क्षणात् ।
कीर्तिः क्वापि विसृत्वरी दशदिश-
श्शुभ्रीचकारैव यत्
सत्यं सत्यमधःकृतो बलिरने-
नैवेत्यशंसन् बुधाः ॥ ५८ ॥

---

[१] सतैलं दीपज्वालनतैलस्यैव पूर्णत्रयीशोपहारेषु प्राधान्यं बोध्यम् । [२] कर्तुः कर्मत्वे ह्याधेयस्याधिकरणत्वमपि युज्यत एव कनकनिचयदानकथामालोच्य कुतूहलाकुलोभूज्जनलोक इति भावः ।

तदैव देवास्सह भूमिदेवै-
विधूय जीर्णालयवासदुःखम् ।
अवापुरत्यन्तसुखं यदुच्चै-
रतोप्यलासीत् परितोस्य कीर्तिः ॥ ५९ ॥

दारिद्र्यसूत्रदृढबन्धनियन्त्रितानां
चारित्रभूषणजुषां कुलकन्यकानाम् ।
मर्त्येश्वरेण विहितेपि विमोक्षमार्गे
कण्ठेष्वलक्ष्यविहतं वरसूत्रबन्धः ॥ ६० ॥

भोज्यश्रियां तदनु विश्वजनान् विलासः
क्वापि क्वचिद्विविधमंगळतूर्यघोषः ।
कुत्रापि राजपुरुषौघगतागतश्री-
स्तत्रातनोत् प्रमुदितान् नृपतेश्शुभर्क्षे ॥ ६१ ॥

चित्राण्यन्नानि भुक्त्वा सकुतुकमधना-
स्साधु दत्वा धनाढ्या
नत्वा नत्वा च भूपप्रतिकृतिमभितो
घोषयात्रासु लोकाः ।

---

[१] देवब्रह्मालयनवीकरणार्थमनल्पवित्तान्यत्र दत्तानीत्यर्थः ।
[२] दरिद्रविप्रकन्यकानां विवाहनिर्वर्तनार्थं च वित्तवितरणं नृपेण विहितमिति यावत् ।

आराध्याराध्य देवानपि विधवशतो-
दुर्लभे भूमिभर्तु-
र्नन्मत्तोऽस्मिञ्जतन्वञ्शिवकलकुशला-
नुत्सवान् सत्सुखान्यान् ॥ ६२ ॥

भूमीन्द्रोपि कृतार्थधीः क्षितिसुरान् संभोज्य साकं स्वकै-
र्भुक्त्वाथो दिवसेश्वरे मृदुकरे कर्तुं प्रजानां स्फुटम् ।
सौख्यं स्वानुविधायिनीव निरते हेमाद्रिसौधं प्रति
प्रस्थायाश्वचतुष्टयाश्रितरथस्सायोपयात्रां व्यधात् ॥ ६३ ॥

नानाविशेषविशदांबरभूषणश्री-
रंभाविलासरुचिरो विबुधावकीर्णः ।
मार्गस्स शक्रधनुरात्तरुचिर्जिगाय
स्वर्गं महेन्द्रयुतमत्र महीन्द्रयोगात् ॥ ६४ ॥

राजत्काञ्चनभूषणैः करिवरैस्तुंगैस्तुरङ्गोत्तमै-
श्शूरैस्सैनिकसत्तमैस्सबपदन्यासक्रमैस्सायुधैः ।
पाठागारकुमारकैर्जयपताकोल्लासिभिश्चाश्रिता
यात्रेयं नृपतेस्समस्तजनताचक्षूंष्यहार्षीच्चिरम् ॥ ६५ ॥

---

[१] अयमप्यद्य किञ्चिज्जनहितं विशेषात् करिष्यतीत्यत्र सूचितम् । [२] वस्त्रमाकाशश्च । [३] कदळी अप्सरोविशेषश्च । [४] विद्वांसो देवाश्च ।

सेनावाद्यत्रिघोषैश्श्रवणमधुरला-
गस्वरौघप्रसारै-
र्मध्ये मध्ये च दीप्यन्नळिकविगळितै-
र्निस्वनैर्दिग्गजानाम् ।
आपूर्यापूर्य कर्णान् विविधजनविम-
र्दाहितात्तस्सुवेषो
गच्छन् मन्दं रथेन क्षितिपतिरखिला-
नन्वगृह्लादिदृक्षून् ॥ ६६ ॥

पुरैत्र गत्वा कनकाद्रिसौध-
मुपाश्रितानां सचिवादिकानाम् ।
सुधारसानक्षिपुटेषु वर्ष-
न्नुपाससादात्र सदोश्चितं सः ॥ ६७ ॥

द्वैप्येन्द्रैस्सचिवादिभिः प्रभुवरैर्भृत्यैश्च तैस्तैर्मुदा
भक्त्याऽऽहृत्य नमस्कृतस्स नृपतिर्भद्रासनाधिष्ठितः ।
उत्तुंगस्वपुराङ्कणाभिचलितांभोधिभ्रमं कुर्वती:
पश्यंस्ता जनताः प्रमोदभरितस्वान्ताः कृतार्थोभवत् ॥

तदा तु भन्दपत्रिकासमर्पणेन चात्मनि
प्रकाशितादराः प्रजाः स्फुटार्थहृद्यया गिरा ।

प्रतोष्य तामनेकधा जनोपकारितां निजा-
मदीदृशत् स धीरधीस्सुदूरमीश्वरो नृणाम् ॥

तदनु स सुकृती निवृत्य सन्ध्यां
विधिवदुपास्य धृतेश्वरप्रसादः ।
गगनलसदुडुश्रियात्तसख्या-
मधिपुरमैक्षत दीपलक्षशोभाम् ॥ ७० ॥

पुरेषु क्षेत्रेष्वप्यथ जलधितीरेषु नगरे
ष्वगेष्वाकाशेषु ज्वलति परितो दीपनिकरे ।
जनौघैस्सस्नेहं खलु विनिहिते स्वामिकुशल-
प्रकाशारूढाशैरहह भुवि किं किं न हि कृतम् ॥ ७१ ॥

पूर्णत्रयीक्षेत्रजुषां विशेषा-
दृष्टैव साक्षात् स महोत्सवोऽस्मिन् ।
इत्येकबुद्धिं व्यतनोत् प्रदीपै-
स्तस्यां निशायां स महोच्छ्रितश्रीः ॥ ७२ ॥

---

[१] प्रजाभ्यो राजकीयवृक्षाणां मूल्यार्धमेव ग्राह्यं राज्ञेत्यादिनिश्चयरू
पम् । [२] पनसवाप्यालयं गत्वा तत्रस्थं शिवमासेवितवानित्यर्थः ।

एवं निर्वर्तितशुभमहाषष्टिपूर्त्युत्सवोसौ
देवः क्षोणिं श्रियमपि तृणायैव मत्वाऽतिधीरः ।
कैवल्यार्थी रघुरिव विजेजीयते सञ्जिहासु-
र्देवेशोस्मिन् विसृजतु मुहुस्सत्कृपाक्षान् कटाक्षान् ॥ ७३ ॥

इति श्रीरामवर्मविजये नव्यकाव्ये
षष्टिपूर्तिर्नाम दशमस्सर्गः
समाप्तं चैतत् काव्यम्
॥ शुभमस्तु ॥

धन्योस्मि तद् भुवनपावनरामवर्म-
माहक्षितीश्वरयशोमयपुण्यसिन्धौ ।
निर्मज्य गाढमथ तद्गुणरूपरत्ना-
न्युद्धृत्य कान्यपि सतां यदुपध्नकार्षम् ॥

१] रघुर्हि सन्त्यक्तराज्यभारोपि वनं नागच्छत् तथायमप्यत्रै-
वैकदेशे वसन्नेवायुश्शेषं नेष्यतीत्याशयः ।

॥ शुद्धिपत्रम् ॥

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
९	१७	मूर्ति	त्रिमूर्ति
,,	,,	षैणन	षण
५	३	यो चि	योऽचि
६	१५	कथंचि	कश्चि
१२	१	हाणीम्	द्रौणीम्
१४	१३	खल	खलु
२१	१२	श्रु ति	कविश्रुतेति
२५	७	स्तां स न	स्तासन
२७	१५	रूढम्	दृढम्
३०	४	वा	द्वा
३२	५	राजा	नरा
३४	१४	दा ब	दाब
३७	११	ना मे	नामे
४२	१	पा	पो
४७	१२	प्रा	प्राः
४८	१२	भावि	दवी
५०	८	तिस्वा	ति स्वा

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
५२	७	दा व	दाव
५५	१०	स्त	स्यत
५७	१०	हाय	हय
७०	१	हा	णा
७३	४	ै	ष्वे
७६	८	स्सोपल्	स्सेपल्
७८	३	लात्वा	नीत्वा
८१	१	कै	कौश्चि
८६	१०	गो ना	गोऽना
८८	१	चे रा	चिरा
९१	१३	द्रवत्	द्रवन्
९२	४	किश्चि	कश्चि
९५	१	नव	नैव
९५	३	क्ष्येव	क्ष्यैव
१०३	२	क्ष्त	क्ष्य
१०५	१४	तात्	ताम्
११६	७	षिशे	विशे
११७	१४	र्णास्वि	र्णान्यस्वि
१३०	५	श्रास्व	श्वास्य
१३४	१४	फवे	फले
१३५	१४	शुचि श	शुचिश

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
१३६	१६	चित्रा	विचित्रा
,,	१८	तीरे	पूरे
१४४	८	विता	विवा
१४७	१४	मु	न
१४८	१२	ताम्	ता
१५१	१६	निमम्	निगुम्
१५२	५	भ	ब
१५५	११	राय	चिराय
१६२	१७	संहित	संचित
१६८	१६	ता	ताम्
१७०	६	भाति	भीति
१७३	७	से	सै
१७९	२	ा	ड
१८१	१३	बनो	करो
१८२	६	हि	हि
१८३	१४	ता	ताम्
१८६	८	दा र	क्षार